MSS No. 138 Subject Philosophy

Name of MSS न्याय मुक्तावली

Author चूड़ामणि

Period — —

Folios 64 (001 to 015, 017 to 022, 024, 025, 027-063)

Script Sanskrit

Source Prithipal Singh

Missing Folios 016, 023, 026

[illegible] missing [illegible] 16 [illegible]

15

ॐ स्वस्ति श्रीगणेशाय नमः चूडामणीकृतविधुर्वलयीकृतवासुकिः भवो भवतु भ
व्याय लीलाताण्डवपण्डितः १ निजनिर्मितकारिकावलीमतिसंक्षिप्तचिरन्तनोक्तिभिः
विशदीकरवाणि कौतुकान्ननु राजीवदयावशंवदः २ सद्द्रव्यागुणगुम्फिता सुकृतिनां
सत्कर्मणां जातिका सत्सामान्यविशेषनित्यमिलिताभावप्रकर्षोज्ज्वला विष्णोर्वक्षसि
विश्वनाथकृतिना सिद्धान्तमुक्तावली विन्यस्ता मनसो मुदं वितनुतां सद्युक्तिरेषा चिरं ३
विघ्नविघाताय कृतं मङ्गलं शिष्यशिक्षायै निबध्नाति नूतनजलधररुचये गोपवधूटीदुकूलचौ-
राय तस्मै कृष्णाय नमः संसारमहीरुहस्य बीजाय १ ननु मङ्गलं न विघ्नध्वंसं प्रति न वा समाप्तिं
प्रति कारणं विना मङ्गलं नास्तिकादिग्रन्थे निर्विघ्नपरिसमाप्तिदर्शनादिति चेन्न अविगीतशिष्टा
चारविषयत्वेन मङ्गलस्य सफलत्वे सिद्धे तत्र च फलजिज्ञासायां सम्भवति दृष्टफलकत्वे दृष्ट

ननु मास्तु विघ्नध्वंसस्य समाप्तिरस्त्विति स्याह
विघ्नध्वंससंबंधेन मंगलाभावात्समाप्तिरित्यर्थः ४

उक्तदृष्टविषयत्वात्

मु. मा. कल्पनाया अन्याय्यत्वादुपस्थितत्वात्समाप्तिरेव फलं कल्प्यते इत्थं च यत्र मंगलं न दृश्यते
२ तत्रापि जन्मान्तरीयमङ्गलं तत्कल्प्यते यत्र कादम्बर्यादौ सत्यपि मङ्गले समाप्तिर्न दृश्यते तत्र ब
लवत्तरो विघ्नो विघ्नप्राचुर्यं वा बोध्यम् प्रचुरस्यास्यैव बलवत्तरविघ्ननिवारणे कारणत्वं बो टि ४
४ आचारः ध्यम् विघ्नध्वंसस्तु मङ्गलस्य द्वारमित्याहुः नव्यास्तु मङ्गलस्य विघ्नध्वंस एव फलं समाप्तिस्तु प्राव:
ल बुद्धिप्रतिभादिकारणकलापात् न चैवं स्वतःसिद्धविघ्नविरहवतः कृतस्य मङ्गलस्य निष्फ प्र. वृत्ति ७८२५ र्
लत्वापत्तिरिति वाच्यम् इष्टापत्तेः विघ्नमङ्ग[illegible]शिष्टाचारत न चाना
स्य निष्फलत्वेन तद्बोधकवेदाप्रामाण्यम् सति विघ्ने तन्नाशस्यैव वेदबोधितत्वात् अत एव
पापभ्रमेण कृतप्रायश्चित्तस्य निष्फलत्वेऽपि न तद्बोधकवेदाप्रामाण्यम् मङ्गलं च विघ्न
ध्वंसविशेषे कारणम् विघ्नध्वंसविशेषे च विनायकस्तवपाठादिः क्वचिच्च विघ्नात्यन्ता

विघ्नध्वंसकामो मंगलमाचरेत् २

बुद्धिशीलं प्रतिभा तत्
द्विप्रोक्ताः स्फूर्तोरवः
धर्मप्रतिभादीत्यादि
नां विघ्नसंसर्गाभाव
परिग्रहः ५

शिष्टमंगलमाच
रतीति शिष्टाचार

पापक्षयकामः
प्रायश्चित्तमाच
रेत् २

स्वजन्यसंस्कारवत्त्वसंबंधेनमंगलस्यतत्वात्   मंगलस्यसफलत्वे

भावएवसमाप्तिसाधनंप्रतिबन्धकसंसर्गाभावस्यैवकार्यजनकत्वात् इत्थंचनास्तिकादिग्र
न्थेषुजन्मान्तरीयमङ्गलजन्यदुरितध्वंसः स्वतःसिद्धविघ्नात्यन्ताभावोवास्तीतिनव्यभिचार इ
त्याहुः संसारेतिसंसारएवमहीरुहोवृक्षस्तस्यबीजायनिमित्तकारणायेत्यर्थः एतेनास्येश्वरप्रमा प
णमपिदर्शितंभवति तथाहि यथाघटादिकार्यंकर्तृजन्यंतथाक्षित्यंकुरादिकमपि न

क्षित्यंकुरादिकंकर्तृजन्यंकार्यत्वाद्घटवत्

बहूनांकर्तृत्वेमेयव्यादिनिर्माणे   स्वस्यादेर्जीवनामभावात्

चतत्कर्तृत्वमस्मदादीनांसंभवतीत्यतस्तत्कर्तृत्वेनेश्वरसिद्धिः नचशरीराजन्यत्वेनक
र्तृजन्यत्वसाधकेनसत्प्रतिपक्षइतिवाच्यम् अप्रयोजकत्वात् ममतुकर्तृत्वेनकार्यत्वेन स्वसाध्यसाधकत्वात्

क्षितिःकर्तृजन्या शरीराजन्यत्वात् आकाशवत् सत्प्रतिपक्षता ४

कार्यकारणभावएवानुकूलस्तर्कः द्यावाभूमीजनयन्देवएकोविश्वस्यगोप्ताभुवनस्य
स्यकर्ता इत्यादयआगमाअप्यनुसंधेयाः ॥ द्रव्यंगुणस्तथाकर्मसामान्यंसविशेषकम् प
समवायस्तथाभावःपदार्थाःसप्तकीर्तिताः २ सप्तमस्याभावत्वकथनादेवषण्णांभावत्वं

प्र   पदार्थानां[illegible]तेन द्रव्यगुणेत्यादि २

सामान्यधर्मेणज्ञातस्यपदार्थस्यविशेषधर्मेणज्ञानंविभागः १

नाश्यत इत्यनुमीयते साहरूपकार्याभावः किंचि
त्कारणाभावप्रयुक्तः कार्याभावत्वात् दंडाभाव
प्रयुक्तघटाभाववत् ५

तेषामिति शेषः

षोडशपदार्थानां सप्तस्वेवान्तर्भा
वादित्यर्थः १

प्राप्तं तेन भावत्वेन षट्स्वनुपन्यासेन न क्षतिः एते च पदार्थाः वैशेषिकप्रसिद्धाः नैयायिका
नामप्यविरुद्धाः प्रतिपादितं चैवमेव भाष्ये अत एवोपमानचिंतामणौ सप्तपदार्थभिन्नत
या शक्तिसादृश्यादीनामतिरिक्तपदार्थत्वमाशंकितं ननु कथमेत एव पदार्थाः शक्तिसादृ
श्यादीनामतिरिक्तपदार्थत्वात् तथाहि मण्यादिसमवहितेन वह्निना दाहो न जन्यते तच्छू
न्येन तु जन्यते तत्र मण्यादिना वह्नौ दाहानुकूला शक्तिर्नाश्यते उत्तेजकेन मण्याद्यपसार
णेन जन्यते इति कल्प्यते एवं सादृश्यमप्यतिरिक्तपदार्थः तद्धि न षट्सु भावेष्वंतर्भवति सा
मान्येऽपि सत्त्वात् यथा गोत्वं नित्यं तथाश्वत्वमपीति सादृश्यप्रतीतेः नाप्यभावे सत्त्वेन प्रती
यमानत्वात् इति चेन्न मण्याद्यभावविशिष्टवह्न्यादेर्दाहादिकं प्रति हेतुत्वेन मण्याभावा
देरेव दाहहेतुत्वकल्पने अनेनैव सामंजस्ये नंतशक्तेस्तत्प्रागभावध्वंसकल्पनानौचित्यात्॥
न चोत्तेजके सति प्रतिबंधकसद्भावेऽपि कार्यदर्शनाद् इति वाच्यम् उत्तेजकाभावविशिष्टमण्या

साहरूपकार्यसंभवे २

यत्रोत्तेजकमपि संभवति मणिरपि संभवतु तत्रादि
प्रत्यक्षाभावप्रयुक्तविशिष्टाभावः यत्रोत्तेजकं ना
स्ति मणिर्विनास्ति तत्र विशेष्याभावप्रयुक्त
विशिष्टाभावः यत्रोत्तेजकं भवति मणिर्नास्ति
तत्रोभयाभावप्रयुक्तविशिष्टाभावः अनेन इति

साहश्यप्रवनघटस्य
न भावा सामान्य
वृत्तित्वात्
दाहादिकं प्रति मण्य
भावस्यहेतुत्वकल्पे
नैव २

मण्यभावविशिष्ट
वह्नित्वं वह्निविशिष्ट
मण्यभावो वा कार्य
तावच्छेदकं इत्यनुवि
शेषणविशेष्यभाव
विनिगमनाविरहेण
गुरुभूते कार्यकार
णभावद्वयापत्तिवार
णाय मण्यभाव
देरेवेति ३

भावस्यकारणत्वात् सादृश्यमपि न पदार्थांतरं किंतु तद्भिन्नत्वे सति तद्गतभूयोधर्मव
त्वे यथा चंद्रभिन्नत्वे सति चंद्रगताह्लादकत्वादिमत्त्वं मुखे चंद्रसादृश्यमिति द्रव्या
णि विभजते क्षितीति क्षित्यप्तेजोमरुद्व्योमकालदिग्देहिनो मनः द्रव्याण्येव गुणा
रूपं रसो गंधस्ततः परम् इति क्षितिः पृथिवी आपो जलानि तेजो वह्निः मरुद्वायुः व्योम
आकाशं कालः समयः दिग् दिशाः देही आत्मा मनः एतानि नव द्रव्याणि इत्यर्थः इंद्रियं
ननु द्रव्यत्वजातौ किं मानं न हि तत्र प्रत्यक्षं प्रमाणं घटतेजःप्रभृतिषु द्रव्यत्वाग्रहादि
ति चेन्न कार्यसमवायिकारणतावच्छेदकतया संयोगस्य विभागस्य वा समवायि
कारणतावच्छेदकतया द्रव्यत्वजातिसिद्धेरिति ननु दशमं द्रव्यं तमः कुतो नोक्तं
न हि प्रत्यक्षेण गृह्यते तस्य च रूपवत्त्वात् कर्मवत्त्वाच्च द्रव्यत्वं तद्धि गंधशून्यत्वान्न
पृथिवी नीलरूपवत्त्वाच्च न जलादिकं तत्प्रत्यक्षे चालोकनिरपेक्षं चक्षुः कारण

यायाकारणतासा
किं द्रव्यीवृत्तित्वाका
रतावातकणलति
ष्टकारतावत्

न्या॰प्र॰

२

तमसो रूपवद्द्रव्यं नित्य मनित्यं वा नित्यं चेत्तेजो ऽविर्भावे नाशः कथं स्यात् अनित्यं चेत्तन्नित्यं चेत् समवायि स्यात् द्रव्य वा तु प्रागभावादिक ल्पना गौरवं स्यात्

मिति चेन्न आवश्यकतेजोभावेनैवोपपन्नो द्रव्यान्तरकल्पनाया अन्याय्यत्वात् रूप
वत्ताप्रतीतिस्तु अस्मद्रूप एव कर्मवत्ताप्रतीतिरपि आलोकापसारणौपाधिकी भ्रान्तै
व तमसो भित्तिरिक्तत्वे अनन्तावयवादिकल्पनागौरवं स्यात् सुवर्णस्य यथा तेजस्यन्त
र्भावस्तथाग्रे वक्ष्यते गुणान्विभजते अथ गुणा इति स्पर्शः संख्या परिमितिः पृथ
क्त्वं च ततः परं संयोगश्च विभागश्च परत्वं चापरत्वकं ४ बुद्धिः सुखं दुःखमिच्छा द्वे
षौ यत्नो गुरुत्वकं द्रवत्वं स्नेहसंस्कारावदृष्टं शब्द एव च ५ एते गुणाश्चतुर्विंशतिसंख्या
काः कणादेन कंठतश्च शब्देन दर्शिताः तत्र गुणत्वजातिसिद्धिरग्रे वक्ष्यते कर्माणि
विभजते उत्क्षेपणमिति उत्क्षेपणं ततोऽपक्षेपणमाकुंचनं तथा प्रसारणं च गमनं
कर्माण्येतानि पंच च ६ कर्मत्वजातिस्तु प्रत्यक्षसिद्धा एवमुत्क्षेपणत्वादिकमपि

रूपरसगंधस्पर्शाः संख्यापरिमाणे पृथक्त्वं संयोगविभागौ परत्वापरत्वबुद्धयः
सुखदुःखेच्छाद्वेषप्रयत्नाश्चेति वैशेषिकसूत्रे

२

व्यक्तेरभेद एकव्यक्तिकत्वमाकाशत्वादेर्जातित्वे बाधकं तुल्यत्वं तुल्यव्यक्तिवृत्तित्वं स्वभिन्नजातिसमनियतत्वं घटत्वकलशत्वादेः परस्परात्यंताभावसमानाधिकरण
योर्धर्मयोरेकत्र समावेशः संकरो भूतत्वं विहाय मनसि वर्तमानस्य मूर्तत्वस्य मूर्तत्वं विहाय गगने वर्तमानस्य भूतत्वस्य पृथिव्यादिचतुष्टये सत्वात् अनवस्था जाते
जातिमत्वे रूपहानिर्विशेषाणां जातिमत्वे निःसामान्यत्वलक्षणविरोधरूपहानिः गगनसामान्येऽनवस्थात्वेनाधारत्वरूपहानिः समवायाभावेयाजातिमत्वे समवायाभाव इति २

कंपनं र

ननु भ्रमणादिकमपि पृथक्कर्माधिकतया कुतो नोक्तमत आह भ्रमणमिति भ्रमणं रे
चनं स्पंदनोर्ध्वज्वलनमेव च तिर्यग्गमनमप्यत्र गमनादेव लभ्यते ७ सामान्यं निरू
पयति सामान्यमिति सामान्यं द्विविधं प्रोक्तं परं चापरमेव च द्रव्यादित्रिकवृत्तिस्तु सत्ता
परतयोच्यते तल्लक्षणं तु नित्यत्वे सत्यनेकसमवेतत्वम् अनेकसमवेतत्वं संयोगा
दीनामप्यस्ति अत उक्तं नित्यत्वे सतीति नित्यत्वे सति समवेतत्वं गगनपरिमाणा
दावप्यस्त्यत उक्तमनेकेति नित्यत्वे सत्यनेकवृत्तित्वं अत्यंताभावेप्यस्त्यतो वृत्तिसामा
न्यं विहाय समवेतेत्युक्तम् एकव्यक्तिमात्रवृत्तिस्तु जातिर्न तथा चोक्तं व्यक्तेरभेद
स्तुल्यत्वं संकरोथानवस्थितिः रूपहानिरसंबंधो जातिबाधकसंग्रहः द्रव्यादीति प
रत्वमधिकदेशवृत्तित्वं अपरत्वमल्पदेशवृत्तित्वं सकलजात्यपेक्षयाधिकदेश
वृत्तित्वात्सत्तायाः परत्वं तदपेक्षया चान्यासां जातीनां अपरत्वं परभिन्ना तु या जा

…योत्तिरजाव
रेफहृतांश
रिकादीनांर

पत्र

न्या॰ मु॰ ६

तिः सैवापरत्वेनोच्यते द्रव्यत्वादिकजातिस्तु परत्वेनोच्यते व्यापकत्वात्तथापि सत्ताद्यपेक्षया व्याप्यत्वा२
दपरापि च पृथिवीत्वाद्यपेक्षया द्रव्यत्वस्याधिकदेशवृत्तित्वाद्व्यापकत्वात्परत्वं सत्तापेक्षया
ल्पदेशवृत्तित्वात् व्याप्यत्वादपरत्वं विशेषं निरूपयति अन्त्यो नित्यद्रव्यवृत्तिर्विशेषः प
रिकीर्तितः अन्ते अवसाने वर्तत इत्यन्त्यः यदपेक्षया विशेषो नास्तीत्यर्थः घटादीनां द्व्यणु
कपर्यन्तानां तु तदवयवभेदात्परस्परं भेदः परमाणूनां परस्परभेदको विशेष एव स तु स्व
त एव व्यावृत्तस्तेन तत्र विशेषान्तरापेक्षा नास्तीत्यर्थः समवायं दर्शयति घटादीनामिति
घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः तेषु जातेश्च संबंधः समवायः प्रकीर्तितः अव
यवावयविनोर्जातिव्यक्त्योर्गुणगुणिनोः क्रियाक्रियावतोर्नित्यद्रव्यविशेषयोश्च यः सं
बंधः समवायः समवायत्वं नित्यसंबंधत्वं तत्र प्रमाणं तु गुणक्रियादिविशिष्टबुद्धिर्विशे
षणविशेष्यसंबंधविषया विशिष्टबुद्धित्वात् दंडीपुरुष इति विशिष्टबुद्धिवदित्यनुमा

जातिगुणक्रियासु विशिष्टबुद्धिः सम्बन्धविषया ... विशिष्टबुद्धित्वात् ... इति मीमांसकमतं तन्मते वेदमनुमानं भवतु सिद्धसाधनं
तथापि नैयायिकमते अतिरिक्तसिद्धत्वात् स्वरूपसंबंधेनार्थान्तरमनभिमतत्वान्निवृत्तिरित्यर्थः इत्यभिप्रायेणाह
न चेति स्वरूपसंबंधेनेति तृतीयायाः अर्थः तस्य तु सिद्धेत्यनेनान्वयः एवं चार्थान्तरं चेत्यनेनान्वयः स्व
रूपसंबंधाभिन्नसिद्धस्य साधनं सिद्धसंबन्धस्वरूपसंबंधस्य साधनमिति यावत् स्वरूपभिन्नसमवायास
साधकमनुमानं इत्यर्थः १

समवायस्यैकत्वे किं मानमत आह लाघवादिति तथा च यथाप्राप्तिः कु
तः स्थितमनेकत्वं लाघवादेकत्वसिद्धिरिति तथा समवायापीत्यर्थः २

मीमांसकानामिति शेषः = दोषं विवादास्पदे ... अर्थं वि नैवज्ञात्वास्य संबन्धः

वे तत्र संयोगादिवाधात्समवायसिद्धिः न च स्वरूपसंबंधेन सिद्धसाधनमर्थान्तरं वा अनंतस्वरूपाणां संबंधकल्पने गौरवात् लाघवादेकसमवायसिद्धिः न च समवायस्यैकत्वे वायौ रूपवत्ताबुद्धिप्रसंगः तत्र रूपसमवायसत्त्वेपि रूपाभावात् न चैवमभावस्यापि वैशिष्ट्यं संबंधान्तरं सिद्ध्येदिति वाच्यम् तस्य नित्यत्वे भूतले घटानयनानंतरमपि घटाभावबुद्धिप्रसंगात् घटाभावस्य तत्र सत्त्वात् तस्य च नित्यत्वात् अन्यथा देशांतरेपि तत्प्रतीतिर्न स्यात् वैशिष्ट्यस्य च तत्र सत्त्वात् मम तु घटे पाकरक्ततादशायां श्यामरूपस्य नष्टत्वान्न तद्धीबुद्धिः वैशिष्ट्यस्यानित्यत्वे त्वनंतवैशिष्ट्यकल्पने तवैव गौरवम् एवं च तत्तत्कालीनं तत्तद्भूतलादिकं तत्तदभावानां संबंधः अभावं विभजते अभावस्त्विति द्विधा संसर्गान्योन्याभावभेदतः अभावत्वं द्रव्यादिषट्कान्योन्याभाववत्त्वं संसर्गेति सं
व
भेदवत्त्वं ।

ननु घटानयने घटाभावो नास्ति तत्कथं न तद्बुद्धिरत आह घटेति ५

वैशिष्ट्यस्य च
भूतलादौ वैशिष्ट्यसम्भा
वस्य संयोगसमवायवा
धात् पदार्थान्तरसिद्धि
रिति भावः ४

ननु सिद्धान्तिनो नव्यमते
पाकरक्ते घटे श्यामरूप
समवायस्य सत्त्वात् श्याम
रूपवत्ताधीप्रसंगः इत्य
तः आह ममेति ७

वैशिष्ट्यस्यानित्यत्वाभ्यु
पगमपक्षे घटानयनेन
घटवति भूतले सत्त्वात् ५

वैशिष्ट्यस्य संबंधत्वानंगीकारे २

नैवं वैशिष्ट्यं नित्यमनि
त्यं वा नित्यत्वे आध
 इत्याशयेनाह तस्येति
४

पूर्वमन्यदेशावच्छिन्न
वैः वर्तमानवच्छिन्ना
भावस्यैकत्वाभिप्राय
र्थः ६

ननु भूतलादिकमिति घटाभाववद्भूतलमिति ज्ञानकालीनं यत्र भूतले घटाभावबुद्धिस्तद्भूतलमित्यर्थः
तत्तदभावानामिति यस्य यस्याभावस्य बुद्धिर्यस्य यस्य तत्तत्सम्बन्धः तथा च नस्वरूपमात्रसंबंधः किन्तु दशाविशेषं
धर्मविशेषं च इति न देशान्तरे अतिप्रसङ्ग इति भावः २

संसर्गश्चान्योन्यं च संसर्गान्योन्ये तयोरभावः संसर्गाभावोन्योन्याभावः संबंधस्याभावस्यान्योन्याभाव इत्यर्थे नात्यन्ताभावस्य क्वाप्युक्त्वं संसर्गश्चान्योन्याभावश्च तयोर्भेदात् तस्मा
द्विसर्गकरणेनान्योन्याभाव एव लभ्यते संसर्गश्चान्योन्यं च संसर्गान्योन्ये तेनोत्पाभावो इति कथ्यते वहनो व्याघातकत्वात् त्रय एव समाः समानो विधेयाः तर्हि द्वि
निरूपणं संसर्गाभावः एकीयस्यैतावद् द्वैताभावः संसर्गाभाव अन्योन्याभावः एकीयस्यैतावद् द्वैताभावः अन्योन्याभाव तयोर्भेदात् तस्माद् द्विसर्गः १

न्या॰
मु

संयोगावच्छिन्नसंयोगात्यंताभावेपि व्याप्तिर्निरूपणं एवं नात्यन्तेति ४

संसर्गान्योन्याभावभेदाद्द्विसर्गः अन्योन्याभावस्यैकविधत्वान्न द्विभागाभावात् संस
र्गाभावं विभजते प्रागभावस्तथा ध्वंसोप्यत्यन्ताभाव एव च एवं त्रैविध्यमापन्नः
संसर्गाभाव इष्यते संसर्गाभावत्वमन्योन्याभावभिन्नाभावत्वं अन्योन्याभावत्वं
तादात्म्यसंबंधावच्छिन्नप्रतियोगिताकाभावत्वं विनाश्यभावत्वं प्रागभावत्वं ज
न्याभावत्वं ध्वंसत्वं नित्यसंसर्गाभावत्वमत्यन्ताभावत्वं यत्र भूतलादौ घटादिक
मपसारितं पुनरानीतं च तत्र घटकालसंबंधाघटकत्वादत्यन्ताभावस्य नित्यत्वे
पि घटकाले न घटात्यन्ताभावबुद्धिः तत्रोत्पादविनाशशाली चतुर्थोयमभाव इति के
चित् तत्र ध्वंसप्रागभावाधिकरणे नात्यन्ताभाव इति प्राचां मतं श्यामघटे रक्तो
नास्ति रक्तघटे श्यामो नास्तीति धीः प्रागभावं ध्वंसं चावगाहते न तु तदत्यन्ताभा
वं तयोर्विरोधात् नव्यास्तु तत्र विरोधे मानाभावात् ध्वंसादिकालावच्छेदेनाप्यत्यं

ननु घटकालेपि घटात्यन्ताभावबुद्धिः

ध्वंसेति व्याप्तिर्निरूपणमिति नात्यन्तेति ४

ननु अत्यन्ताभावस्य नित्यत्वे घटानयनानंतरमपि भूतले घटो नास्तीति प्रतीत्यापत्तिरिति न ग्राह्य
त्वादिति तथा च संबंधाभावादेव घटानयनानंतरं घटाभावबुद्धिर्न भवति कालविशेषणविशिष्ट
स्यापि संसर्गितो पगमादेव घटवति घटो नास्तीति प्रतीत्यापत्तेर्न संसर्गाभावेतरानाभाव
इत्यत्र संकेचित् इत्यनेन सूचितम् १

ननु तर्हि रक्तरूपप्रागभावाधिकरणे श्यामघटे श्यामरूपध्वंसाधिकरणे च रक्त
घटे कथं रक्तो नास्ति श्यामो नास्तीति प्रतीति ध्वंसप्रागभावयोरधिकरणे त्यंता
भाव [illegible] नास्ति [illegible] श्यामघटेति २

ननु अभावत्वत्रैविध्यादि विभागोनुपपन्नो भावत्वमानाभावादि
त्यभिप्रायेण प्राभाकरः शंकते नन्विति २

अभावानामधिकरणात्मकत्वे २

अभावानामधिक
रणात्मकत्वे ३

ताभावो वर्न्नंत इत्याहुः नन्वस्त्वभावानामधिकरणात्मकत्वं लाघवादिति चेन्न अनंता
धिकरणात्मकत्वापेक्षयाऽतिरिक्तकल्पनाया एव लघीयस्त्वात् एवं चाधाराधेय
भावोप्युपपद्यते एवं च तत्तच्छब्दगंधरसाद्यभावानां नेत्रादींद्रियैः प्रत्यक्षत्वमप्युप
पद्यते अन्यथा तत्तदधिकरणानां नेत्रादींद्रियाग्राह्यत्वात् प्रत्यक्षत्वं न स्यात् एतेन ज्ञान
विशेषकालविशेषात्मकत्वमभावस्येत्यपि प्रत्युक्तं अप्रत्यक्षत्वापत्तेः इदानीं पदार्थानां
साधर्म्यवैधर्म्ये वक्तुं प्रक्रमते सर्वेषामपि पदार्थानां ज्ञेयत्वादिकमुच्यते समानो धर्मो
येषां ते सधर्माणस्तेषां भावः साधर्म्यं समानो धर्म इति फलितोर्थः एवं च विरुद्धो धर्मो
येषां ते विधर्माणस्तेषां भावो वैधर्म्यं विरुद्धो धर्म इति फलितोर्थः ज्ञेयत्वं ज्ञानविषय
ता सा च सर्वत्रैवास्ति ईश्वरादिज्ञानविषयितायाः केवलान्वयित्वात् एवमभिधेयत्वप्रमे नि
यत्वादिकमपि बोध्यम् द्रव्यादयः पंचभावा अनेके समवायिनः द्रव्यगुणकर्मसामा

नेत्रेन्द्रियग्राह्यग्रह
ते नेत्रेन्द्रियेण न द्रुत
जातिमदभावत्व
समवायाभावग्रहणे ३

यदि ज्ञानस्याभावत्व
रूपत्वं तदा ज्ञानस्या
त्मन्येव विद्यमानत्वा
त् जलादिधिकरणाक
गंधाभावप्रतीतिर्न स्या
त् ५

वक्ष्यमाणदूषणे
न ४

अभिधाविषयत्वं अभिधा च संकेतग्राह्यो धर्मः पदार्थ इति मीमांसकाः
संकेतभिन्नायामभिधायां मानाभावात् संकेत एवेति नैयायिकाः १

विषयभेदेन विषयताभेदेऽपि ज्ञानविषयता
नेन केवलान्वयित्वमपि ... इति भ्रमः २

वाच्यत्वमपि

सामान्यविशेषयोः प्रतियोगित्वेनसमवायसंबंधित्वंवर्त्ततएव २

सा० मु

स्यविशेषाणांलक्षणधर्मोऽमनेकत्वंसमवायित्वंच यद्यप्यनेकत्वमभावेऽप्यस्ति तथाप्य
नेकत्वेसतिभावत्वंनास्ति तथाचानेकभाववृत्तिपदार्थविभाजकोपाधिमत्वंफलि
तोर्थः तेनप्रत्येकंघटादौनाव्याप्तिः समवायित्वंसमवायसंबंधेनसंबंधित्वं ननु
६ समवायवत्वेसमान्यादावभावात् तथाच समवेतवृत्तिपदार्थविभाजकोपाधिम
त्वंफलितोर्थः तेननित्यद्रव्येषुनातिव्याप्तिः सत्तावंतस्त्रयस्त्वाद्याः द्रव्यगुणकर्म-
णांसत्तावत्वमित्यर्थः गुणादिर्निर्गुणक्रियः यद्यपिगुणक्रियाशून्यत्वं आद्यक्षणे
घटादावतिव्याप्तं क्रियाशून्यत्वंगगनादावतिव्याप्तं तथापिगुणवद्वृत्तिधर्मवत्वं ए
व कर्मवद्वृत्तिपदार्थविभाजकोपाधिमत्वंचतदर्थः नहिघटत्वादिकंद्रव्यत्वंवागुणव
द्वृत्तिकर्मवद्वृत्तिवा किंतु गुणत्वादिकंतथा आकाशत्वादिकंतुनपदार्थविभाजको
पाधिः सामान्यपरिहीनास्तुसर्वेजात्यादयोमताः सामान्यानधिकरणत्वं सामा

६

न्यादीनामित्यर्थः पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतम् पारिमाण्डल्यं
अणुपरिमाणम् कारणत्वं तद्भिन्नानामित्यर्थः अणुपरिमाणं तु न कस्यापि कार
णं तद्धि स्वाश्रयारब्धद्रव्यपरिमाणारंभकं भवेत् तच्च न संभवति परिमाणस्य
स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वात् महदारब्धस्य महत्तरत्ववदणुजन्यस्या
णुतरत्वप्रसङ्गात् एवं परममहत्परिमाणम् अतीन्द्रियसामान्यविशेषाश्चेध्याः
इदमपि योगिप्रत्यक्षविषयस्य न कारणत्वं ज्ञायमानं सामान्यं न प्रत्यासत्तिः ज्ञाय
मानं लिङ्गं नानुमितिकरणमित्यभिप्रायेणोक्तम् आत्ममानसप्रत्यक्षे आत्म
परममहत्त्वस्य कारणत्वात् परममहत्परिमाणमाकाशादेर्बोध्यम् तस्यापि न
कारणत्वमिति नैयायिकानामाशय इत्यन्ये तन्न ज्ञानादिनिष्ठप्रत्यक्षकारणताया एवात्मा
वैहत्त्वात् ननु कारणत्वं किमित्यत आह अन्यथासिद्धिशून्यस्य नियतापूर्वव

मित्ता कारणत्वं भवेत्तस्मात्तद्विधा परिकीर्त्तितं समवायिकारणत्वं ज्ञेयमथाप्यसम
वायिहेतुत्वम् एवं न्यायनयज्ञैस्तृतीयमुक्तं निमित्तहेतुत्वम् यत्समवेतं कार्यं भवति
वेहि समवायिजनकं [illegible] तत्र तत्रात्मत्वं जनकं द्वितीयमुपाभ्णोपरं तृतीयस्यात् तस्य कार
णत्वस्य तद्भिन्नं समवायिकारणप्रत्यासन्नं कारणं द्वितीयमसमवायिकारणमि
त्यर्थः अत्र यद्यपि तुरीतंतुसंयोगे पटासमवायिकारणत्वं स्यादेवं वेगादीनामभि
घाताद्यसमवायिकारणत्वं स्यादेवं ज्ञानादिकमपिच्छाद्यसमवायिकारणं स्यात्त
थापि पटासमवायिकारणलक्षणे तुरीतंतुसंयोगभिन्नत्वं देयं तुरीतंतुसंयोग
स्तु तुरीपटसंयोगस्यासमवायिकारणं भवत्येव एवं वेगादिकं [illegible] संस्काराद्यसमवायि
कारणं भवत्येवेति तत्तत्कार्यासमवायिकारणलक्षणे तत्तद्भिन्नत्वं देयम् आत्म
विशेषगुणानां तु क्वाप्यसमवायिकारणत्वं नास्ति तेन तद्भिन्नत्वं सामान्यलक्ष

णेदंयमेव अत्र समवायिकारणे प्रत्यासन्नत्वं द्विविधं कार्यैकार्थप्रत्यासत्त्या कार
णैकार्थप्रत्यासत्त्या च आद्यं यथा घटादिकं प्रति कपालसंयोगादिकमसमवायि
कारणं तस्य हि कार्येण घटेन सह कारणेन कपालसंयोगस्यैकस्मिन्कपाले प्रत्या
सत्तिरस्ति द्वितीयं यथा घटरूपं प्रति कपालरूपमसमवायिकारणम् तत्र घट
रूपं प्रति कारणं घटस्तेन सह कपालरूपस्यैकस्मिन्कपाले प्रत्यासत्तिरस्ति तथा च
क्वचित्समवायसंबंधेन क्वचित्स्वसमवायिसमवायसंबंधेन इति फलितोऽर्थः इत्थं
च कार्यैकार्थकारणैकार्थान्यतरप्रत्यासत्त्या समवायिकारणे प्रत्यासन्नं कारणं
ज्ञानादिभिन्नमसमवायिकारणमिति सामान्यतो लक्षणं पर्यवसितम् आभ्यां
समवायिकारणासमवायिकारणाभ्यां परं भिन्नं तृतीयं निमित्तकारणमित्यर्थः
इदानीमन्यथासिद्धत्वमेवाकियतानेदाह येन सह पूर्वभावः यत्कार्यं प्रति कारण

न्या॰ मु॰

८

स्यपूर्ववृत्तिता येन रूपेण गृह्यते तत्कार्य्यं प्रति तद्रूपमन्यथासिद्धमित्यर्थः यथा घटं प्रति
दंडत्वादिकमिति द्वितीयमन्यथासिद्धमाह कारणमादायवायस्य यस्य स्वातंत्र्येण
न्वयव्यतिरेकौ न स्तः किंतु कारणमादायान्वयव्यतिरेकौ गृह्येते तदन्यथासिद्धं यथा
दंडरूपं तृतीयमाह अन्यं प्रति पूर्वभावे ज्ञाते यत्पूर्वभावविज्ञानम् अन्यं प्रति पूर्ववृत्ति
त्वेन गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववर्तित्वं गृह्यते तस्य तत्कार्यं प्रति अन्यथासिद्धत्वम्
यथा घटादिकं प्रत्याकाशस्य आकाशस्य हि घटादिकं प्रति कारणत्वमाकाशत्वेन
वक्तव्यं न हि शब्दसमवायिकारणत्वम् अतः शब्दं प्रति कारणत्वं गृहीत्वैव घटा
दिकं प्रति जनकत्वं ग्राह्यमतस्तदन्यथासिद्धं ननु शब्दाश्रयत्वेन तस्य कारणत्वे
कान्यथासिद्धिरिति चेत् पञ्चमीति गृहाण [illegible]आकाशस्य शब्दं प्रति जनकत्वे कि
मवच्छेदकमिति चेत् कवत्वादिकं विशेषपदार्थो वेति चतुर्थमन्यथासिद्धमाह

८

जनकं प्रति पूर्ववर्त्तितामपरिच्छिद्य न यस्य गृह्यते यत्कार्यजनकं प्रति पूर्ववर्त्तितां गृही
त्वैव यस्य यत्कार्यं प्रति पूर्ववर्त्तित्वं गृह्यते न स तत्कार्यं प्रति अन्यथासिद्धत्वम् यथा
कुलालपितुर्घटं प्रति न स हि कुलालपितृत्वेन घटं प्रति जनकत्वे अन्यथासिद्धत्वे
कुलालत्वेन रूपेण जनकत्वात्तिव्याप्तेः कुलालमात्रस्य घटजनकत्वात् पञ्चमम
न्यथासिद्धमाह अतिरिक्तमथापि यद्भवेन्नियतावश्यकपूर्वभाविनः अवश्यक्लृप्त
नियतपूर्ववर्त्तिन एव कार्यसंभवे तद्भिन्नमन्यथासिद्धमित्यर्थः अत एव प्रत्यक्षे महत्
त्वं कारणमनेकद्रव्यवत्त्वमन्यथासिद्धं न च हि महत्त्वमवश्यक्लृप्तं तेनानेकद्रव्यवत्त्वम
न्यथासिद्धं न च वैपरीत्ये किं विनिगमकमिति वाच्यं महत्त्वत्वजातेः कारणतावच्छेद
कलाघवात् एते पञ्चान्यथासिद्धा दण्डत्वादिकमादिमं घटादौ दण्डरूपादि द्विती
यमपि दर्शितं तृतीयं तु भवेद्व्योम कुलालजनकोऽपरः पंचमो रासभादिः स्यादेतेष्वा

भा॰ मु॰

९

वरूपंत्वेवमेतो यद्यपि तद्व्यक्तित्वेन प्रतियोगितासम्भवान्नियतपूर्ववर्त्तित्वमस्ति तथापि घटजा
तीयं प्रतिसिद्धकारणभावैर्दण्डादिभिरेव तद्व्यक्तेरपि सम्भवे ऽन्यथासिद्ध इति भावः
एतेष्विति एतेषु पंचान्यथासिद्धेषु मध्ये पंचमोऽन्यथासिद्ध आवश्यकः तेनैव परेषां च
रितार्थत्वात् तथाहि दण्डादिभिरवश्यक्लृप्तनियतपूर्ववर्त्तिभिरेव कार्यसम्भवे दण्डत्वादिकम
न्यथासिद्धम् न च वैपरीत्ये किं विनिगमकमिति वाच्यं दण्डत्वस्य कारणत्वे दण्डघटि
तपरम्परायाः संबन्धत्वकल्पने गौरवात् एवमन्येषामप्यनेनैव चरितार्थत्वं संभवंति व
समवायिकारणत्वं द्रव्यस्यैवेति विज्ञेयं स्पष्टं गुणकर्म्ममात्रवृत्ति ज्ञेयमथाप्यस
यि मवायिहेतुत्वम् गुणकर्मेति असमवायिकारणत्वं गुणकर्मभिन्नानां वैधर्म्यं ननु ए
गुणकर्मणोः साधर्म्यमित्यत्रापि तात्पर्यं अथवाऽसमवायिकारणत्वभिन्ना
भिन्नजातिमत्त्वं तदर्थः तेन ज्ञानादीनामसमवायिकारणत्वविरहेऽपि नाव्याप्तिः

९

अन्यत्र नित्यद्रव्येभ्य आश्रितत्वमिहोच्यते नित्यद्रव्याणि परमाण्वाकाशादीनि वि
हायाश्रितत्वं साधर्म्यमित्यर्थः आश्रितत्वं तु समवायसंयोगाद्यन्यतरसंबंधेन वृत्ति
मत्वं विशेषणतया नित्यानामपि कालादौ वृत्तेः कालिकविशेषणतान्यसंबंधे
न वृत्तिमत्वमिति परमार्थः इदानीं द्रव्यस्यैव विशिष्य साधर्म्यं वक्तुमारभते क्षि
त्यादीनां नवानां तु द्रव्यत्वं गुणयोगिता स्पष्टम् क्षितिर्जलं तथा तेजः पवनो मन
एव च परापरत्वमूर्तत्वक्रियावेगाश्रया अमी पृथिव्यप्तेजोवायुमनसां परत्वा
परत्ववत्वं मूर्तत्ववत्वं कर्मवत्वं वेगवत्वञ्च साधर्म्यं न च यत्र घटादौ परत्ववत्व
मपरत्ववत्वं वा नोत्पन्नं तत्राव्याप्तिरिति वाच्यं परत्वादिसमानाधिकरणद्रव्यत्व
व्याप्यजातिमत्वस्य विवक्षितत्वात् मूर्तत्वमपकृष्टपरिमाणवत्वं तच्चैतेषामेव
गगनादिपरिमाणस्य कुतोप्यपकृष्टत्वाभावात् एवं कर्मवत्वं कर्मसामा

अपं घटः घटमहं जानामि मया ज्ञातो
घटः द्वितीयज्ञानस्य विषयः ज्ञानं घटः २

नाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वं वेगवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं चेति बोध्यम् का
लखात्मदिशां सर्वगतत्वं परमं महत् कालखात्मदिशां सर्वगतत्वं सर्वमूर्त्तसंयोगि
त्वं परममहत्त्वञ्च परममहत्त्वत्वं जातिविशेषः अपकर्षानाश्रयपरिमाणवत्त्वं वा क्षि
त्यादिपञ्च भूतानि पृथिव्यप्तेजोवाय्वाकाशानां भूतत्वं तच्च बहिरिन्द्रियग्राह्यवि
शेषगुणवत्त्वं आत्मग्राह्यत्वं बहिरिन्द्रियजन्यलौकिकप्रत्यक्षस्वरूपयोग्यत्वं बोध्य
म् तेन ज्ञातो घट इति प्रत्यक्षे ज्ञानस्याप्युपनीतभानविषयत्वान्नात्मनि ना
तिव्याप्तिः न चाणुप्रत्यक्षाविषयरूपादिमति परमाण्वादावव्याप्तिः तस्यापि स्वरूप
योग्यत्वात् महत्त्वलक्षणकारणान्तरासन्निधानान्न प्रत्यक्षं अथवाऽऽत्मावृत्तिवि
शेषगुणवत्त्वं भूतत्वम् चत्वारि स्पर्शवन्ति पृथिव्यप्तेजोवायूनां स्पर्शवत्त्वम् द्र
व्यारम्भकत्वं चतुर्षु स्यात् पृथिव्यप्तेजोवायुषु चतुर्षु द्रव्यारम्भकत्वं न च द्रव्यानारम्भ

त्वा
नु
१०
स्वसंयुक्तमनः
संयुक्तात्मसम
वेतत्वसंबंधेन ज्ञा
नस्यापि घटसंबंध
जन्यज्ञानविषय
त्वादतिव्याप्तिः १

परमाण्वादेः
घटपदादकारणोपि
त्वसेहे निससत्वके
कार्यहेतन २

ज्ञातो घट इत्यस्मिन्प्रत्यक्षे ज्ञानस्योपनीतभानविषयत्वात् आत्मनि अति
व्याप्तिः
घटघटत्वज्ञानम्

क्षणसमावेशश्चेदव्या
प्यवृत्तित्व २

केघटादावव्याप्तिः द्रव्यसमवायिकारणवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्याविवक्षितत्वात्
अथाकाशशरीरिणाम् अव्याप्यवृत्तिक्षणिको विशेषगुण इष्यते आकाशात्मना
मव्याप्यवृत्तिक्षणिकविशेषगुणवत्त्वम् आकाशस्यहि विशेषगुणः शब्दः स चाव्याप्य
वृत्तिः यदा किंचिदवच्छेदेन शब्द उत्पद्यते तदाऽन्यावच्छेदेन तदभावस्यापि सत्त्वात्॥
क्षणिकत्वंच तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वं योग्यविभुविशेषगुणानां स्वोत्तर
वर्त्तिगुणनाश्यत्वात् प्रथमशब्दस्य द्वितीयशब्देन नाशः एवं ज्ञानादीनामपि ज्ञा
नादिकंहि यदात्मनि विभौ शरीरावच्छेदेनोत्पद्यते तदा घटाद्यवच्छेदेन तदभावोस्त्ये
व एवं ज्ञानादिकमपि क्षणद्वयावस्थायि इत्यन्व अव्याप्यवृत्तिविशेषगुणवत्त्वं द
णीकविशेषवत्त्वं चार्थः पृथिव्यादौ रूपादिविशेषगुणानां स्वोत्पत्तौऽव्याप्यवृत्तित्वं तु तत्र
पृथिव्यादौ अव्याप्यवृत्तिः संयोगादिरस्तीति विशेष इत्युक्ते न च रूपादीनामपि कदाचि॥

स्वसमानाधिक
रणात्यंताभावप्रति
योगित्वं अव्याप्यवृ
त्तित्वं २

आदिनाश्रद्धत्वपरिग्रहः १

कृष्णत्वजातिः [illegible] दासः ३

चतुःक्षणवृत्तिजन्यावृत्तिजातिमद्गुणत्वात् १

तृतीयक्षणे नाशसंभवात् क्षणिकविशेषगुणवत्त्वं द्वित्वादावतिव्याप्तमिति वाच्यं चतुःक्ष

णवृत्तिजन्यावृत्तिजातिमद्विशेषगुणवत्त्वस्य तदर्थत्वात् अपेक्षाबुद्धिः क्षणत्रयन्तिष्ठति

क्षणचतुष्टयस्यापि व्याप्तिरूपादौ वर्त्तेन इति तद्दुर्दोषः ईश्वरज्ञानस्य चतुःक्षणवृत्ति

त्वात् ज्ञानत्वस्य तद्वृत्तित्वाज्जन्येत्युक्तम् यदाकाशजीवात्मनोः साधर्म्यं तदाजन्ये

ति नदेयं द्वेषत्वादिकमादाय लक्षणसमन्वयात् परममहत्त्वस्य तादृशगुणत्वाभावे तु

पर्यन्तेण द्वित्वादीनामपि नाशाभ्युपगमाद्द्वित्वादीनामपि तथात्वात् तद्वारणाय विशे

षेति विलक्षणञ्चेत्तं चौच्यामिच्छादिकमादायात्मनि लक्षणसमन्वयात् रूपद्रवत्वप्र

त्यक्षयोगिनः प्रथमाश्रयः पृथिव्यप्तेजसां रूपवत्त्वं द्रवत्ववत्त्वं प्रत्यक्षविषयत्वञ्च

साधर्म्यः नच चक्षुरादीनां भर्जनकपालस्थवह्नेश्च रूपवत्त्वे किं मानमिति वा

च्यं तत्रापि तेजस्त्वेन रूपानुमानात् एवं वाय्वानीतपृथिवीजलतेजोभागानाम

न्या

मु

लक्षणचतुष्टयं तु

नकिमपि जन्य

ज्ञानादिकं

तिष्ठति रू

पत्वादिकं तु

अपेक्षाबुद्धि [illegible]

[illegible]

[illegible]

का सा च प्रथमे क्ष

णे उत्पद्यते द्वितीय

क्षणे निर्विकल्पकं

ज्ञानं तृतीयक्षणे

सविकल्पकं चतुर्थ

क्षणे नाशः इति क

मः

११

प्रथमक्षणेऽपेक्षाबुद्धिः द्वितीयक्षणे द्वित्वोत्पत्तिः

तृतीयक्षणेऽपेक्षाबुद्धिनाशः चतुर्थक्षणे [illegible] द्वित्वनाशः १



आदिना घ्राणादिः २

पि पृथिवीत्वादिना रूपानुमाने बाधात् नच घटादौ द्रुतसुवर्णादिभिन्नेतेजसि द्र
वत्ववत्वमव्याप्तमितिवाच्यम् द्रवत्ववृत्तिद्रव्यत्वव्याप्यजातिमत्वस्याविवक्षित
त्वात् घृतजतुप्रभृतिषु पृथिवीषु जलेषु द्रुतसुवर्णादौ तेजसि द्रवत्वसत्वान्नच पृ
सर्वत्र थिवीत्वादिसत्वान्न दोषायेत्यस्य समन्वयः नच प्रत्यक्षविषयत्वं परमाण्वादावव्याप्तमिति
व्याप्तञ्च रूपादाविति वाच्यं लौकिकचाक्षुषप्रत्यक्षविषयवृत्तिद्रव्यत्वव्याप्यजा
तिमत्वस्य विवक्षितत्वात् आत्मन्यतिव्याप्तिवारणाय चाक्षुषेति गुरुत्वादिद्वैरस
वती गुरुत्ववत्वरसवत्वञ्च पृथिवीजलयोरित्यर्थः नच घ्राणेन्द्रियादीनांवाय्वानी
तपार्थिवादिभागानांच रसादिमत्वे किंमानमितिवाच्यम् तत्रापि पृथिवीत्वादिना
तदनुमानात् द्वयोर्नैमित्तिकद्रवः पृथिवीतेजसोरित्यर्थः नच नैमित्तिकद्रवत्व
घटादौ वह्न्यादौ चाऽव्याप्तमितिवाच्यम् नैमित्तिकद्रवत्वसमानाधिकरणद्रव्यत्वव्या

ना॰ मु॰

प्रजातिमत्त्वस्य क्विवृत्तित्वात् आत्मनो भूतवर्गाश्च विशेषगुणयोगिनः पृथिव्यप्तेजोवा ॥ ननु स्वरूपं साधर्म्यं ज्ञेयत्वं तन्न न कस्यापि वैधर्म्यमित्याशंक्याह ज्ञेयत्वादिकमिति

य्वाकाशात्मनां विशेषगुणवत्त्वमित्यर्थः यद्वा यस्य साधर्म्यं वैधर्म्यमितरस्य तत्र ज्ञेय

त्वादिकं विहायेति बोध्यम् ननु कस्यापि न वैधर्म्यं केवलान्वयित्वात् स्पर्शादयोऽष्टौ वेगा

ख्यः संस्कारो मरुतो गुणाः स्पर्शाद्यष्टौ रूपवेगौ द्रवत्वं तेजसो गुणाः स्पर्शादयोऽष्टौ

१२ वेगाख्यं द्रवत्वं च गुरुत्वकं रूपं रसस्तथा स्नेहो वारिण्येते चतुर्दश स्नेहहीनाः गंध

युक्ताः क्षितावेते चतुर्दश बुद्ध्यादिषट्कं संख्यादिपञ्चकं भावना तथा धर्माधर्मौ गु

णा एते आत्मनः स्युश्चतुर्दश संख्यादिपञ्चकं कालदिशोः शब्दश्च ते चेश्वरे संख्या

दयः पंच बुद्धिरिच्छा यत्नोऽपि चेश्वरे परापरत्वे संख्यादिपंच वेगश्च मानसे वायौ ने स्व

वैकादश तेजसो गुणा जलादिति प्रामाण्यता चतुर्दश दिक्कालयोः पञ्च षड्

वेचाम्बरे महेश्वरेऽष्टौ मनसस्तथैव च । [illegible]

नेसंख्यादयः खेऽप्याकाशे

१२

गंधहेतुत्वं कारणतावच्छेदकतया प्रमितो यथा चैष्टं गंधे लिङ्गः २

गंधवत्त्वावच्छिन्नं प्रति पृथिवीत्वाद्यहेतुत्वा नंगीकारे ४

साधर्म्यवैधर्म्ये निरूप्य संप्रति प्रत्येकं पृथिव्यादिकं निरूपयति तत्रेति क्षितिर्गंधहेतु
र्नानारूपवती मता गंधहेतुरिति गंधसमवायिकारणमित्यर्थः यद्यपि गंधवत्त्व
मात्रं लक्षणमुचितं तथापि पृथिवीत्वजातौ प्रमाणोपन्यासाय कारणत्वमुपन्यस्तम्
न चाग्रे पृथिवीत्वं गंधसमवायिकारणतावच्छेदकतया सिध्यति अन्यथा गंधत्वा
वच्छिन्नस्याकस्मिकत्वापत्तेः न च पाषाणादौ गन्धाभावाद् गंधवत्त्वलक्षणमव्या
प्तमिति वाच्यं तत्रापि गन्धसत्त्वात् अनुपलब्धिस्तु अनुत्कटत्वेनाप्युपपद्यते
कथमन्यथा तद्भस्मनि गंध उपलभ्यते भस्मनो हि पाषाणध्वंसजन्यत्वात्पा
षाणोपादानोपादेयत्वमिति सिध्यति यद्द्रव्यं यद्द्रव्यध्वंसजन्यं तत्तदुपादानोपादेय
मिति व्याप्तेः दृष्टं चैतत् खण्डपटे महापटध्वंसजन्ये इत्थं च पाषाणपरमा

कल्पनाय

अनुत्कटत्वेन

साधर्म्यवैधर्म्ये न गंधप्रति तादात्म्यसंबन्धेन पृथिवी कारणं

ननु गंधवत्त्वस्य पृथिवीलक्षणत्वे पाषाणादौ गंधानुपलब्धेरव्याप्तिः तद्वारणायेति न चेति

यद्यपि पृथिवीत्व सत्त्वात्तत्र प्रमा णान्तरापेक्षा न तथापि तद्व्याप्यगोपसमा रोपेण पृथिवीत्वसि द्धये इदमुपन्यासः ३ मिति २

पाषाणादावपि पृथिवीत्वेन गंधसत्त्वात् पक्षानुमानात् ४

पाषाणभस्म पाषाणोपादानोपादेयं भवति पाषाणध्वंसजन्यत्वात् १

पाषाणस्य
हेतोः पृथिवीत्वात्तत्र च पाषाणस्यापि पृथिवीत्वम् तथा च तस्य गन्धवत्त्वे बाधकाभावः
नानारूपेति शुक्लनीलादिभेदेन नानाजातीयरूपं पृथिव्यामेव वर्त्तते न तु जलादौ
तत्र शुक्लस्यैव सत्त्वात् पृथिव्यां त्वेकस्मिन्नपि धर्मिणि पाकवशेन नानारूपसंभ
वात् न च नानारूपं यत्रैकोत्पन्नं तत्राव्याप्तिः रूपद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिम
त्त्वस्य रूपनाशवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य वा विवक्षितत्वात् वैशेषिकन
ये पृथिवीपरमाणौ रूपनाशस्य रूपान्तरस्य च सत्त्वात् न्यायनये घटादौ वा पि
तत्सत्त्वाल्लक्षणसमन्वयः षड्विधस्तु रसस्तत्र गन्धस्तु द्विविधो मतः मधुरकटु
कषायादिभेदेन यः षड्विधो रसः स पृथिव्यामेव जले तु मधुर एव रसः अत्रापि र
विवत् रसद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं लक्षणार्थोऽवसेयः गन्धस्त्विति

द्विविध इतिवक्तुमुचितमितिमात्रं ननु द्विविधगंधवत्त्वमपि लक्षणं द्विविधत्वस्यार्थ
त्वात् द्वैविध्यंच सौरभासौरभभेदेनबोध्यं स्पर्शस्तस्यास्तु विज्ञेयो ह्यनुष्णा
शीतपाकजः तस्याः पृथिव्याः अनुष्णाशीतस्पर्शवत्त्वं वायावपि वर्त्तते इत्यतः
उक्तं पाकज इति इदंच पृथिव्याः स्पर्शोनुष्णाशीत इतिज्ञापनार्थं तदुक्तं वस्तुतस्तु
पाकजस्पर्शवत्त्वमात्रंलक्षणम् अधिकस्यवैयर्थ्यात् यद्यपिपाकजस्पर्शः पटा
दौनास्ति तथापि पाकजस्पर्शवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वमर्थोबोध्यः नित्यानि
त्या च सा द्वेधा नित्यास्यादणुलक्षणा अनित्यातु तदन्यास्यात्सैवावयवयोगिनी
सा पृथिवी द्विविधा नित्यानित्या चेत्यर्थः अणुलक्षणा परमाणुरूपा नित्या तदन्या पर
माणुभिन्ना पृथिवी द्व्यणुकादिः सर्वाप्यनित्यैवेत्यर्थः सैव अनित्या पृथ्वी सैव अव

पाकजस्पर्शवत्त्वस्य
श्रोक्तौचितार्थः ४

पटादावित्यादि
पदेन वैशेषिकमते
पिठिमात्रपरिग्र
हः २

न्या मु
७

पाषाणस्य

हेतोः पृथिवीत्वात्तज्जलपाषाणस्यापि पृथिवीत्वम् तथा च तस्य गन्धवत्त्वे बाधकाभावः
नानारूपेति शुक्लनीलादिभेदेन नानाजातीयरूपं पृथिव्यामेव वर्तते न तु जलादौ
तत्र शुक्लस्यैव सत्त्वात् पृथिव्यां त्वेकस्मिन्नपि धर्मिणि पाकवशेन नानारूपसंभ
वात् न च नानारूपं यत्र नोत्पन्नं तत्राव्याप्तिः रूपद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिम
त्त्वस्य रूपनाशवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य वा विवक्षितत्वात् वैशेषिकन
ये पृथिवीपरमाणौ रूपनाशस्य रूपान्तरस्य च सत्त्वात् न्यायनये घटादावपि
तत्सत्त्वाल्लक्षणसमन्वयः षड्विधस्तु रसस्तत्र गन्धस्तु द्विविधो मतः मधुरकटु
कषायादिभेदेन यः षड्विधो रसः स पृथिव्यामेव जले तु मधुर एव रसः अत्रापि रू
पवत् रसद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं लक्षणार्थोऽवसेयः गन्धस्त्विति ७

द्विविध इति वस्तुस्थितिमात्रं ननु द्विविधगंधवत्त्वमपि लक्षणं द्विविधत्वस्यार्थ
त्वात् द्वैविध्यं च सौरभासौरभभेदेन बोध्यं स्पर्शस्तस्या अनुष्णाशीत इत्यनुष्णा
शीतपाकजः तस्याः पृथिव्याः अनुष्णाशीतस्पर्शवत्त्वं वायावपि वर्त्तते इत्यतः
पाकजस्पर्शवत्वस्य ऽोक्तौ चेत्यर्थः ४
उक्तं पाकज इति इदं च पृथिव्याः स्पर्शोऽनुष्णाशीत इति ज्ञापनार्थं तदुक्तं वस्तुतस्तु
पाकजस्पर्शवत्त्वमात्रं लक्षणम् अधिकस्य वैयर्थ्यात् यद्यपि पाकजस्पर्शः पटा
दौ नास्ति तथापि पाकजस्पर्शवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वमर्थो बोध्यः नित्यानि
पटादावित्यादि दनवैशेषिकमते पि विमान परिहारः ५
त्या चसाद्वैधा नित्या स्यादणुलक्षणा अनित्या तु तदन्या स्यात् सैवावयवयोगिनी
सा पृथिवी द्विविधा नित्याऽनित्या चेत्यर्थः अणुलक्षणा परमाणुरूपा नित्या तदन्या पर
माणुभिन्ना पृथिवी द्व्यणुकादिः सर्वाप्यनित्यैवेत्यर्थः सैव अनित्या पृथिव्येव अव

नन्वयं घट इत्यादिप्रतीतिरेव तत्र प्रमाणं भवि
त्यत आह परमाणुपुंजैरिति १

सा॰ यवयवीत्यर्थः ननु अवयविनि किंमानं परमाणुपुंजैरेवोपपत्तेः नचैवं परमाणू
मु॰ नामतीन्द्रियत्वाद्दूरादेः प्रत्यक्षत्वं न स्यादिति वाच्यं एकस्य परमाणोरप्रत्यक्षत्वेपि तत्स
मूहस्य प्रत्यक्षत्वात् यथा एकस्य केशस्य दूरे ऽप्रत्यक्षत्वेपि तत्समूहस्य प्रत्यक्षत्वम् नचै
१८ कः स्थूलो घट इति बुद्धेरनुपपत्तिरिति वाच्यम् एको महान्धान्यराशिरितिवदुपप
त्तेः नैवं परमाणोरतीन्द्रियत्वेन तत्समूहस्यापि प्रत्यक्षत्वायोगात् दूरस्थकेश
स्तु नातीन्द्रियः सन्निधाने तस्यैव प्रत्यक्षत्वात् न च तर्हि नीरूपपरमाणुपुंजे स्था घटोत्पत्तिकाले
प्यत्वान्न प्रत्यक्षत्वविरोध इति वाच्यं महद्रूपस्य महद्रूपानुपादानत्वात् अन्यथा महद्रूपाद्रूप
सम्मेहे प्रवाहे ३ चतुरणुकादिसंततौ कदाचित् महत्त्वप्रसंगात् नचातीन्द्रियत्वेनैव लाघवे कथम स्योत्पत्तिरनंगीकारे २
हद्रूपसंततेर्हद्रूपदहनोत्पत्तिरिति वाच्यं नत्वनंतदंतःपातिभिः हद्रूपदह
नावयवैः स्थूलदहनोत्पत्तेरुपगमात् नचाहद्रूपमहाणुकेन कथं हद्रूप

न त्वतादृशाद्दहनोत्पत्तिस्थले तदंतःपातिभिरतीन्द्रियैस्तत्तः पाति भिः

अत्रादिनालोकादिपरिग्रहः २

त्रसरेणोर्महत्त्वमिति दिति वाच्यं यतो नवयं दृश्यत्वमहदृश्यत्वं वा कस्यचित्तदभावा
दावदृष्टे परंतु महत्त्वोद्भूतरूपादिकारणसमुदायवशाद्दृश्यत्वं तदभावे चा महत्त्वोद्भूतरूपाद्यभावे २
दृश्यत्वं तथा च त्रसरेणोर्महत्त्वमावश्यकं ननु द्व्यणुकादेरेव तदभावान्न हि त्वन्म महत्त्वाभावात् ३
तेपि दृदं संभवति परमाणौ महत्त्वाभावात् इत्थं चावयवे सिद्धौ तेषामुत्पादं विना
द्व्यणुकयोः प्रत्यक्षत्वादनित्यत्वं तेषां चावयवावयवधारायाः अनंतत्वे मेरुसर्षप
योरपि साम्यप्रसंगः अतः क्वचिद्विश्रामो वाच्यः यत्र च विश्रामस्तस्यानित्यत्वे
असमवेतभावकार्योत्पत्तिप्रसंगात् अतस्तस्य नित्यत्वं महत्परिमाणतारतम्यस्य
गगनादौ विश्रान्तत्वमिव अणुपरिमाणतारतम्यस्यापि क्वचिद्विश्रान्तत्वम
स्तीति तस्य परमाणुत्वसिद्धिः नन्वत्रसरेणावेव विश्रामोस्त्विति वाच्यम् त्रस
रेणुः सावयवः चाक्षुषद्रव्यत्वात् घटवदित्यनुमानेन तदवयवसिद्धौ तत्र

आत्मन्यभिचारवारणाय चाक्षुषपदं घटाभावेन व्यभिचारवारणाय द्रव्यपदम् १

त्रसरेणोरवयवसिद्धौ

परमाणोरवयवधारापि सिद्धेरत्र

अविभुवृत्तिमहत्त्वप्रति

न्या० मु०

त्रसरेणोरवयवः सावयवः महदवयवत्वात् कपालवदित्यनुमानेनावयवसि-
द्धेः नचेदमप्रयोजकम् अपकृष्टमहत्त्वं प्रत्यनेकद्रव्यवत्त्वस्य प्रयोजकत्वात् नचैवं
क्रमेण तदवयवधारापि सिद्ध्येदिति वाच्यं अनवस्थाभयेन तदसिद्धेरिति साचात्रिधाभ-
वेद्देहमिंद्रियविषयलक्षणा साकार्यरूपापृथिवी त्रिविधा शरीरेन्द्रियभेदादित्यर्थः तत्र
१५ देहमुदाहरति योनिजादि भवेद्देहमिंद्रियं घ्राणलक्षणं विषयो मृत्पाषाणकादिलक्षणा
दृष्टांतउदाहृतः योनिजमयोनिजं चेत्यर्थः योनिजमपि द्विविधं जरायुजमंडजं च जरायु-
जं मानुषादीनाम् अण्डजं सर्पादीनाम् अयोनिजं स्वेदजोद्भिज्जादिकं स्वेदजाः कृमिदंशा-
द्याः उद्भिदस्तरुगुल्माद्याः नारकीणां शरीरमप्ययोनिजम् नचमानुषादिशरीरस्या-
पार्थिवत्वे किंमानमिति वाच्यं गंधादिमत्त्वस्यैव प्रमाणत्वात् नच क्लेदोष्मादेरुपल-
म्भादाप्यकत्वादिकमपि स्यादिति वाच्यं तथा सति जलत्वपृथिवीत्वादिना संकरप्र

योनिजं शुक्रशोणितजन्यं परस्परमेलनजन्यम् तद्भिन्नमयोनिजं १

गर्भवेष्टनचर्मपुटकं जरायुजमानुषादीनां ... पक्ष्युरगाणां पार्थिव ॥ १ ॥

गंधादिमत्त्व

प्रयत्नकार्य

१५

तेन स्पर्शाकाद्विकन्न्तत्वसंतानं सर्वमेव विषयो भवति शरीरेन्द्रिययोर्विषयत्वेपि प्र
कारान्तरेणोपन्यासः शिष्यबुद्धिवैशद्यार्थः जलं निरूपयति वर्णः शुक्लो रसस्प
र्शौ जले मधुरशीतलौ स्नेहस्तत्र वायिकारणतावच्छेदकतया जलत्वजातिसि
द्ध्यति यद्यपि स्नेहत्वं नित्यानित्यवृत्ति तथा न कार्यतावच्छेदकम् तथापि जन्यस्ने
हत्वं वा ध्रुवम् अणुपरमाणौ जलत्वं न स्यात् तत्र जन्यस्नेहाभावात् न स्वच नित्य
स्वरूपयोग्यफलावश्यम्भावनियमादिति चेन्न जन्यस्नेहजनकतावच्छे
दिकतया जन्यजलत्वजातेः सिद्धौ तदवच्छिन्नजनकतावच्छेदकतया नित्यजल
त्वजातिसिद्धेः शुक्लरूपमेव जलस्येति दर्शयितुमुक्तं वर्णः शुक्ल इति नन्वशु
क्लरूपवत्त्वं लक्षणं अथवा नैमित्तिकद्रवत्ववदवृत्तिरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्या

मा॰ मु॰

पज्जातिमत्त्वं अभास्वरशुक्लेतररूपासमानाधिकरणरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्या
प्यजातिमत्त्वं तदर्थः तेन स्फटिकादौ नातिव्याप्तिः रसस्पर्शवतीति जलस्य मधुर
एव रसः शीत एव स्पर्श इति रसवद्वृत्तिमधुररसवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजा
तिमत्त्वं तेन शर्करादौ नातिव्याप्तिः शीतेतरस्पर्शवद्वृत्तिस्पर्शवद्वृत्तिजातिम
त्त्वं तदर्थः ननु शुक्लरूपमेवेति कुतः कालिन्दीजलादौ नीलिमोपल
ब्धेरिति चेन्न नीलजनकतावच्छेदकायाः पृथिवीत्वजातेरभावात् जले नील
रूपासम्भवात् कालिन्दीजले नीलत्वप्रतीतिस्त्वाश्रयोपाधिकी अत एव वियत
ि विक्षिप्ते धवलिमोपलब्धिः अथ जले माधुर्ये किं मानम् न हि प्रत्यक्षेण कोपि
रसस्तत्रानुभूयते न च नारिकेलजलादौ माधुर्यस्योपलम्भात् एवेति वाच्यम् तस्या

२ १२

ष्ट्रौपाधिकीत्वादन्यथा जंवीरकरवीररसादावाम्लोपलब्धेरम्लादिमत्वमपिस्या
दिति चेन्न हरीतक्यादिभक्षणस्य जलरसव्यंजकत्वात् न च हरीतक्यामेव जलोष्मसं
योगाद्रसांतरोपलब्धिरिति वाच्यम् कल्पनागौरवात् पृथिवीत्वस्याम्लादिजनक
तावच्छेदकत्वाच्च जलेनाम्लादिकं जंवीररसादौ त्वाष्ट्रौपाधिकी तथा प्रतीतिः॥
एवं जलस्य शीतस्पर्शजनकतावच्छेदकं जलत्वं तद्वह्नेर्जनकतावच्छेदकं ते
जस्त्वं वा बाधात् घृष्टचंदनादेः शैत्योपलब्धिः स्यादनंतर्वर्तिशीततरसलिलस्यैव
तेजःसंयोगात् जले उष्मत्वप्रतीतिरौपाधिकी स्फुटैव न तत्र पाकासंभवात् स्नेहस्त
त्र द्रवत्वेनु सांसिद्धिकमुदाहृतम् घृतादावपि तदंतर्वर्तिसलिलस्यैव स्नेहः ज
लस्यैव स्नेहसमवायिकारणत्वात् तेन जलत्वं स्नेहहेतुरिति मंतव्यः द्रवत्वमिति सा
सिद्धिकद्रवत्वत्वं जातिविशेषः प्रत्यक्षसिद्धस्तद्वच्छिन्नजनकतावच्छेदकमपि तदेव

ता॰
मु
१८

तिभावः तैलादावपि जलस्यैव द्रवत्वं स्नेहप्रकर्षेण च दहनानुकूलत्वमिति वक्ष्यते नि
त्यानादि प्रथमान्तं किं तु देहमयोनिजम् इंद्रियं रसनं सिन्धुर्हिमादिर्विषयो मतः ४
पृथिव्या इव इत्यर्थः तथा हि जलं द्विविधम् नित्यमनित्यं च परमाणुरूपं नित्यं द्व्य
णुकादि सर्वमनित्यमवयवसमेतं च अनित्यमपि त्रिविधम् शरीरेन्द्रियविषयभेदात्
पृथिवीतो योनिविशेषत्वमाह किं त्विति अयोनिजमेवेत्यर्थः जलीयं शरीरं अयोनि
जं वरुणलोके प्रसिद्धं इंद्रियं रसनं जलीयमित्यर्थः तथा हि रसनं जलीयं गन्धाद्य
व्यंजकत्वे सति रसव्यंजकत्वात् सक्तुरसाभिव्यंजकोदकवत् रसनसन्निकर्षे व्यभि
चारवारणाय द्रव्यत्वं देयं विषयं दर्शयति सिन्धुः समुद्रः हिमं तुषारः आदिपदा
त्सरित्कासारकरकादिः सर्वोपि ग्राह्यः न च हिमकरकयोः कठिनत्वात् पार्थिवत्वमि
ति वाच्यम् उष्मणा विलीनयोस्तयोर्जलत्वस्य प्रत्यक्षसिद्धत्वात् यद्द्रव्यं यद्द्रव्य

१८

ध्वंसजन्यमिति व्याप्तेर्जलोत्पादानोपादेयत्वसिद्धिः ॥ अदृष्टविशेषेण द्रवत्वप्रतिरोधा
त् करकायां काठिन्यप्रत्ययस्य भ्रान्तित्वात् तेजो निरूपयति स्पर्शोडष्णस्तेजसस्त
स्याद्रूपं शुक्लं भास्वरं उष्णत्वं स्पर्शनिष्ठजातिविशेषः प्रत्यक्षसिद्धः इत्थं च जन्यो
ष्णस्पर्शसमवायिकारणतावच्छेदकं तेजस्त्वजातिविशेषस्तस्य परमाणुवृत्तित्वं तु
जलत्वस्येवानुसंधेयम् नचोष्णस्पर्शवत्त्वं चेच्चन्द्रकिरणादावव्याप्तमिति वाच्यम् त
ह्स्प त्रापि उष्णस्पर्शसत्त्वात् किंतु तदंतःपातिजलस्पर्शेनाभिभवादग्रहः एवं चन्द्रकिर
णादौ पार्थिवस्पर्शेनाभिभवाच्चक्षुरादौ चानुद्भूतत्वाच्च न तद्ग्रहः रूपमिति वैश्वान
रे मरकतकिरणादौ पार्थिवरूपेनाभिभवात् शुक्लरूपाग्रहः अथ तद्रूपाग्रहे धर्मि
णोऽपि चाक्षुषत्वं न स्यादिति चेन्न अपदीयरूपेणैव धर्मिणो ग्रहसम्भवात् शङ्ख
स्यवापि तत्पीतिम्ना वह्नौ तु शुक्लरूपमभिभूतं किन्तु तदीयमुष्णत्वमभिभूतमित्यन्य

मा॰
मु॰
१९

नैमित्तिकंद्रवत्वंतुनिमित्ताद्दिवघृतवत् ४१ सुवर्णादिरूपेतेजसितत्सत्वात् नचनैमित्ति
कद्रवत्वलक्षणस्यहनादावव्याप्तिर्घृतादावतिव्याप्तेश्चेतिवाच्यम् पृथिव्यवृत्तिनैमित्तिकद्रव
त्ववद्वृत्तिजातिमत्वस्यविवक्षितत्वात् निमित्तादिजलस्यैवतात्पर्यः तथाहि नहिद्विविधम् नि
त्यमनित्यंच नित्यंपरमाणुरूपन्तदन्यदनित्यमवयविच तच्चत्रिविधम् शरीरेंद्रियवि
षयभेदात् शरीरमयोनिजमेव तच्चवरुणलोकादौप्रसिद्धं ःप्रवयोविषयस्समाद्ः॥ इन्द्रि
यंनयनंवन्हिःस्वर्णादिर्विषयोमतः ननुचक्षुस्तैजसमित्येकिंमानमितिचेत् चक्षुस्तैजसं
परकीयस्पर्शाद्यव्यंजकत्वेसतिपरकीयरूपव्यंजकत्वात् प्रदीपवत् प्रदीपस्यस्वीयस्प
र्शाव्यंजकत्वात् प्रथमपरकीयेति घटादेःस्वीयरूपव्यंजकत्वात्व्यभिचारवारणाय
द्वितीयपरकीयेति अथवाप्रभायादृष्टान्तत्वसम्भवादाद्यपरकीयेतिनदेयम् चक्षुः
सन्निकर्षव्यभिचारवारणायद्रव्यत्वन्देयम् विषयंदर्शयति वह्नीति ननुसुवर्णं

स्यतैजसत्वे किंमानमिति चेन्न सुवर्णं तैजसं असति प्रतिबंधके अत्यंतानलसंयोगेप्यनुच्छिद्य
मानद्रवत्वात् यन्नैवं तन्नैवं यथा पृथिवी न चाप्रयोजकं पृथिवीद्रवत्वस्य जन्यजल
द्रवत्वस्य चाग्निसंयोगनाश्यत्वात् नन्वनुपीतिमगुरुत्वाश्रयस्य पार्थिवस्यापि तदानीं द्रु
तत्वात् तेन व्यभिचार इति चेन्न जलमध्यस्थमसीतोद्रवन्नस्याद्रवत्वात् अपरे तु पीतिमा
श्रयस्यात्यंताग्निसंयोगेपि पूर्वरूपापरावृत्तिदर्शनात् तत्प्रतिबंधकं विजातीयद्रव
द्रव्यं कल्प्यते तथा हि अग्निसंयोगी पीतिमगुरुत्वाश्रयः विजातीयरूपप्रतिबंधक
द्रवद्रव्यसंयुक्तः अत्यंताग्निसंयोगेपि पूर्वरूपविजातीयरूपानधिकरणत्वात् न
जलमध्यस्थपीतिपटवत् तस्य च पृथिवीजलभिन्नस्य तैजसत्वनियमात् वायु
न्निरूपयति अपाकजोनुष्णाशीतस्पर्शस्तु पवनो मतः तिर्यग्गमनवानेष ज्ञेयः
स्पर्शादिलिंगकः पूर्ववन्नित्यतायुक्तं देहव्यापित्वगिंद्रियं ४३ अनुष्णाशीतस्पर्शः

व

मा॰
मु॰
२०

पृथिव्यामपि सत्त्वात् उक्तमपाकजइति अपाकजस्पर्शस्य जलादावपि सत्त्वादुक्तं अनुष्णा
शीतइति एतेन वायौ विजातीयस्पर्शोप्यादर्शितः तज्जनकतावच्छेदकं वायुत्वमिति भावः॥
तथा च वायुः स्पर्शादिलिङ्गकः वायुर्हि स्पर्शशब्दधृतिकम्पैरनुमीयते विजातीयस्पर्शेन
विलक्षणशब्देन तृणादीनां धृत्या शाखादीनां कम्पेन च वायोरनुमानात् यथा च वायु
र्न प्रत्यक्षस्तथाग्रे वक्ष्यते पूर्वं तदिति वायुर्हि द्विधा नित्योऽनित्यश्च परमाणुरूपो नित्य
स्तद्भिन्नोऽनित्यः अवयववत्त्वमेव तत्त्वं सोऽपि त्रिविधः शरीरेन्द्रियविषयभेदात् तत्र
शरीरमयोनिजं पिशाचादीनाम् परं तु जलीयतैजसवायवीयशरीराणां पार्थि
वभागोपष्टम्भकत्वात् उपभोगक्षमत्वम् जलादीनां प्राधान्याज्जलीयत्वादिक
मिति अत्रैव विशेषमाह देहव्यापीति शरीरव्यापकमिन्द्रियं स्पर्शग्राहकं
त्वक् तच्च वायवीयं रूपादिषु पञ्चसु मध्ये स्पर्शस्यैवाभिव्यञ्जकत्वात् अङ्गसङ्गिस

लित्तश्रोत्राभिव्यंजकव्यजनपवनवत् विषयं दर्शयति प्राणादिस्तु महावायुः पर्यंतो
विषयो मतः यद्यप्येको नित्यो वायुश्चतुर्विधः तस्य चतुर्थी विधा प्राणादिरित्युक्तमाकरेत
तथापि संदेहापदिव त्रैविध्यमुक्तं प्राणस्त्वेक एव हृदादिनानास्थानवशात्तु मुखनिर्ग
मादिनानाक्रियाभेदेन नानासंज्ञां लभते इति पर्यवसन्नो वायुः आकाशं निरूपयति ॥
आकाशस्य तु विज्ञेयः शब्दो वैशेषिको गुणः अथाकाशकालदिशामेकैकव्यक्तित्वादा
काशत्वादिकं न जातिः किंतु आकाशत्वं शब्दाश्रयत्वं वैशेषिक इति कथनं तु विशेष
गुणान्तरव्यवच्छेदाय एतेन प्रमाणमपि दर्शितम् तथाहि शब्दो गुणः चक्षुर्ग्रहणा
सति योग्ये बहिरिंद्रियग्राह्यजातिमत्त्वात् स्पर्शवत् शब्दो द्रव्यसमवेतः गुणत्वात् संयो
गवदित्यनुमानेन शब्दद्रव्यसमवेतत्वसिद्धिः शब्दो न स्पर्शवद्विशेषगुणः अग्निसंयोगा
समवायिकारणकत्वाभावे सति अकारणगुणपूर्वकप्रत्यक्षत्वात्सुखवत् पाकज

ना° मु°

२१

रूपादौव्यभिचारवारणायसमवेतत्वंते पटरूपादौव्यभिचारवारणायाकारणगुणपूर्व
कैति जलपरमाणुरूपादौव्यभिचारवारणायप्रत्यक्षेति नदिक्कालमनोगुणः विशे
षगुणत्वात् रूपवत् नात्मविशेषगुणः बहिरिंद्रिययोग्यत्वात् रूपवत् इत्थंच प्रा
द्व्याधिकरणतानवमद्रव्यंगगननामकंसिद्धमिति नचवाद्यावयवेषुसत्त्वंशब्दकमे
णावायोकारणगुणपूर्वकः शब्दउत्पद्यतामितिवाच्यं अयावद्द्रव्यभावित्वेनवायोर्वि
शेषगुणत्वाभावात् नचशरीरस्यविषयस्यचाभावात् इंद्रियंदृश्यमिति इंद्रियंचभ
वेच्छोत्रमेकः सन्नप्युपाधितः नन्वाकाशलाघवादेकंसिद्धं श्रोत्रंतुपुरुषभेदाद्भिन्नं
कथमाकाशस्यादितिचेन्नत्राह आकाशः एकः सन्नप्युपाधितः कर्णशष्कुल्यादेर्भे
दाद्भिन्न इतिश्रोत्रात्मकंभवति इत्यर्थः कालंनिरूपयति जन्यानांजनकः कालोज
गतामाश्रयोमतः परापरत्वयोर्हेतुः क्षणादिःस्यादुपाधितः नन्वप्रमाणादृशीय

साध्यघनामाज
न्मानामजनि ये नि
यद्यद्रूपादिकं तत्तु
त्रयं शब्देतत् ५

ती

तुमाह जगतामाश्रयः इदानींघट इत्यादि प्रतीतिः सूर्यपरिस्पंदादिके यस्याविषयीक
रोतितदासूर्यपरिस्पंदादिनाघटादेः संबंधोवाच्यः सचसंयोगादिर्नसंभवतीति समस्त
कप्रमाणांतरंदर्शयति परापरत्वधीहेतुः परत्वादिबुद्धेःसाधारणनिमित्तंकाल
एव परत्वापरत्वयोरसमवायिकारणसंयोगाश्रयोलाघवादितिरेतुः कालएव
कल्प्यतइतिभावः नन्वेकस्यकालस्यसिद्धौ क्षणादिनमासवर्षसमयभेदोनस्यादि
त्यतआह क्षणादिःस्यादुपाधितः कालस्त्वेकोपिउपाधिभेदात्क्षणादिव्यवहारवि
षयः उपाधिस्तुस्वजन्यविभागप्रागभावावच्छिन्नंकर्म पूर्वसंयोगावच्छिन्नविभा
गोवा पूर्वसंयोगनाशावच्छिन्नोत्तरसंयोगप्रागभावोवा उत्तरसंयोगावच्छिन्नंक
र्मवा नचउत्तरसंयोगानंतरंक्षणव्यवहारोनस्यादितिवाच्यं कर्मान्तरसत्वादि
ति महाप्रलयेक्षणादिव्यवहारोयद्यस्तितदानापत्याद्यध्वंसेनैवोपपादनीयइति

कालएवत
त्संबंधघटकः
कल्प्यते इत्यं
चतस्याश्रय
त्वं

न्या
मु
२२

ह्निनादिव्यवहारस्तु तत्तन्मन्तणष्टैरिति दिशं निरूपयति दूरांतिकादि धीहेतुरेका
नित्यादिगुच्यते ४५ उपाधिभेदादेकापि प्राच्यादिव्यपदेशभाक् दूरत्वमंतिक
त्वंच दैशिकं परत्वमपरत्वंच बोध्यम् तद्बुद्धेरसाधारणं बीजं दिगेव दैशिकपरत्वा
परत्वयोरसमवायिकारणसंयोगाश्रयतया लाघवादेका दिक् सिद्धा इति भा
वः ननु यद्येकैव दिक् तदा प्राचीप्रतीच्यादिव्यवहारः कथमुपपद्यते इत्याह उ
यत्र पाधिभेदादिति यदा पुरुषस्य उदयगिरिसन्निहितायादिक सा प्राची एवं तत्पुरुषस्य सः प्राची
उदयगिरिव्यवहितायादिक सा प्रतीची एवं तत्पुरुषस्य सुमेरुसन्निहिता दि
गुदीचीतद्व्यवहितात्ववाची सर्वेषामेव वर्षाणां मेरु उत्तरतः स्थितः इति नि
यमात् आत्मानं निरूपयति आत्मेन्द्रियाद्यधिष्ठातेति आत्मत्वजातिस्तु सुख
दुःखादिसमवायिकारणतावच्छेदकतया सिद्ध्यति ईश्वरेऽपि सा जातिरस्त्येव एवं
त

२२

अदृष्टादिरूपकारणाभावाच्च न सुखदुःखाद्युत्पत्तिः नित्यस्य सुखरूपयोग्यस्य फलत्वसंभ
भावनियमात् दुःखस्याप्रयोजकत्वात् अपरे तु ईश्वरे सजातिर्नास्त्येव प्रमाणाभावात्
न च दशाम इश्वरत्वापत्तिः ज्ञानवत्त्वेन विभजनादित्याहुः इन्द्रियाद्यधिष्ठाता इन्द्रिया
णां शरीरस्य च परंपरया चैतन्यसंपादकः यद्यप्यात्मनि अहं सुखी दुःखीत्यादिप्रत्यक्ष
विषयत्वमस्त्येव तथापि विप्रतिपन्नं प्रति प्रथमत एव शरीरादिभिन्नत्वस्य प्रतीतिगोचरत्वं इ
ति प्रतिपादयितुं न शक्यते इत्यतः प्रमाणांतरं दर्शयति करणं हि सकर्तृकम् वास्यादी
नां छिदादिकरणानां कर्त्तारमंतरेण फलानुपधानं दृष्टमेवं चक्षुरादीनां ज्ञानकर
णानामपि फलोपधानं कर्त्तारमंतरेण नोपपद्यते इत्यतिरिक्तः कर्त्ता कल्प्यते ननु श
रीरस्य कर्तृत्वमस्त्वित्यत आह शरीरेषु न चैतन्यं मृतेषु व्यभिचारतः ननु चैतन्यं ज्ञाना
दिकमेव मुक्तात्मनां तन्नास्ति इव मृतशरीराणामपि तदभावे का हानिः प्राणाभावे

मु॰
मा॰
२३

नेष्टज्ञानाभावस्यासिद्धेरिति चेन्न शरीरस्य चैतन्ये बाल्ये विलोकितस्य स्थविरे स्मरणानुप
पत्तेः शरीराणामवयवोपचयापचयैरुत्पादविनाशशालित्वात् न च पूर्वशरीरोत्प
न्नसंस्कारेण द्वितीयशरीरे संस्कार उत्पाद्यत इति वाच्यम् अनन्तसंस्कारकल्पनागौर
वात् एवं च शरीरस्य चैतन्ये बालकस्य स्तन्यपाने प्रवृत्तिर्न स्यात् इष्टसाधनताज्ञानस्य
तद्धेतुत्वात् तदानीमिष्टसाधनत्वानुभावकाभावात् मन्मते तु जन्मान्तरानुभूतेष्टसा
धनत्वस्य हेतुत्वात् तदानीं स्मरणादेव प्रवृत्तिः न च जन्मान्तरानुभूतमन्यदपि स्मर्य
येतेति वाच्यम् उद्बोधकाभावात् संस्कारनाशाद्वा अत्र तु जीवनादृष्टमेवोद्बो
धकं कल्प्यते इत्थं च संसारस्यानादितया आत्मनोऽनादित्वसिद्धावनादिभावस्य
नाशासम्भवान्नित्यत्वं सम्भवतीति बोध्यम् ननु चक्षुरादीनां ज्ञानादिकं प्रति कार
णत्वं कर्तृत्वं चास्तु विरोधे साधकाभावात् अत आह तथात्वे चेदिन्द्रियाणामुपघा
ते कथं स्मृतिः तथात्वे चैतन्ये उपघाते नास्मृतिरिति अर्थाच्चक्षुरादीनामेकैकापाये स्मृतेः

२३

पूर्वं चक्षुषानुभूतानां चक्षुरभावे स्मरणं न स्यात् अनुभवितुरभावात् अन्येनानुभूतस्या
न्येन स्मरणासंभवात् अनुभवस्मरणयोः सामानाधिकरण्येन कार्यकारणभावा
दिति भावः ननु चक्षुरादीनां चैतन्यं मास्तु मनसस्तु नित्यस्य चैतन्यं स्यादत आह म
नोऽपि न तथा ज्ञानाद्यनध्यक्षं तदा भवेत् न तथा न चेतनं ज्ञानाद्यनध्यक्षं तदा भवेत्
मनसोऽणुत्वात् प्रत्यक्षे च महत्त्वस्य हेतुत्वात् मनसि ज्ञानसुखादिसत्त्वे तत्प्रत्यक्षानु
पपत्तिरित्यर्थः यथा मनसोऽणुत्वं तथाग्रे वक्ष्यते ननु क्षणिकविज्ञानमेवात्मास्तु तस्य स्व
तः प्रकाशरूपत्वात् चेतनत्वं ज्ञानसुखादिकं तु तस्यैवाकारविशेषः तस्यापि भाव
त्वादेव क्षणिकत्वं पूर्वपूर्वविज्ञानस्य उत्तरोत्तरविज्ञानहेतुत्वात् सुषुप्त्यवस्था
यामप्यालयविज्ञानधारा निराबाधैव मृगमदवासनावासितवसन इव विज्ञान
जनितसंस्काराणामुत्तरोत्तरविज्ञाने संक्रान्तत्वान्नानुपपत्तिः स्मरणादेरिति चेन्न

द्विविधं विज्ञानं प्र
वृत्तिविज्ञानमालयवि
ज्ञानं चेति तत्राद्यं घ
टः पट इति विज्ञानं अ
हमित्याकारमालय
विज्ञानं तदेवात्मा न
प्रविज्ञानस्य

वृ ज्ञानस्य जगद्विषयत्वं यत्किंचिद्विषयत्वं वा अभिप्रेतमिति
विकल्प्याद्ये दूषणमाह तस्येति विज्ञानस्येत्यर्थः



तस्य जगद्विषयकत्वे सर्वज्ञत्वापत्तेः यत्किंचिद्विषयकत्वे विनिगमनाविरहः सुषुप्ता
वपि विषयावभासप्रसंगाच्च न तदानीं निराकाकाचिज्ज्ञप्तिसंततिरनुवर्तत इति चेन्न त
स्याः प्रकाशत्वे प्रमाणाभावात् अन्यथा घटादीनामपि ज्ञानत्वापत्तेः न च दृष्टाप
त्तिः विज्ञानव्यतिरिक्तवस्तुनोऽभावादिति वाच्यं घटादेरनुभूयमानस्यापलपितु
मशक्यत्वादाकारविशेषस्यैवायं विज्ञानस्येति चेन्न किमयमाकारोऽतिरिच्यते वि
ज्ञानात्तर्हि समायातं विज्ञानव्यतिरिक्तेनेनातिरिच्यते चेत्तर्हि समूहालंबने नीला
कारेऽपि पीताकारः स्यात् स्वरूपतो विज्ञानस्याविशेषात् अयोहरूपो नीलत्वादिर्वि
ज्ञानधर्म इति चेन्न नीलत्वादीनां विरुद्धानामेकस्मिन्नसमावेशात् एतत्रथा विरो
धाव धारणस्यैव दुरूपपन्नत्वात् न च वासनासंक्रमः संभवति मातृपुत्रयोरपि वा
सनासंक्रमप्रसंगात् न चोपादानोपादेयभावो नियामक इति वाच्यं वासनायाः

संक्रमासंभवात् उत्तरस्मिन्नुत्पन्ने एव संक्रम इति चेन्न तदुत्पादकाभावात् चिता
मेवोत्पादकत्वे तदासंस्कारानन्त्यप्रसंगः क्षणिकविज्ञाने स्मृतिप्रायविशेषः कल्प
ते इति चेन्न मानाभावात् कल्पनागौरवाच्च एतेन क्षणिकशरीरेष्वेवं चेतन्यम
पि प्रत्युक्तं गौरवादतिशयमानाभावाच्च बीजादावपि सहकारिसमवधानास
मवधानाभ्यामेवोपपत्तेः कुर्वद्रूपत्वाऽकल्पनात् अस्तु तर्हि क्षणिकविज्ञाने गौ
रवात् नित्यविज्ञानमेवात्माऽयवनाप्यभावादयमात्मा सत्यं ज्ञानमनंतं ब्रह्मेत्यादि
श्रुतेश्चेति चेन्न तस्य सविषयत्वासंभवस्य दर्शितत्वान्निर्विषयस्य ज्ञानत्वे माना
भावात् सविषयकत्वस्याप्यननुभवाद् नो ज्ञानभिन्नात्मनि सत्यज्ञानेति सिद्धं सत्यं ज्ञा
नमिति ब्रह्मपरं जीवेषु नोपयुज्यते ज्ञानाज्ञानेत्वसुखित्वादिभिर्जीवानां भेदसिद्धे
स्तत्रामीश्वरभेदोऽन्यथा बंधमोक्षानुपपत्तेः योऽपि ईश्वराभेदबोधको वेदः सोऽपि

तदभेदेन तदीयत्वं प्रतिपादयन्नस्तौति अभेदभावनयैव ज्ञातव्यमिति वदन्ति मुक्त
एव सर्वे आत्मानः समर्पिता इति श्रूयते मोक्षदशायामज्ञाननिवृत्तौ अभेदो जाय
ते इत्यपि न भेदस्य नित्यत्वेन नाशासंभवात् भेदनाशेऽपि व्यक्तिद्वयस्यास्त्येव
न च द्वित्वमपि न स्यादिति वाच्यम् तथा निर्धर्मके ब्रह्मण्यसत्त्वाभावेऽपि सत्यत्वरू
पवत् द्वित्वाभावेऽपि व्यक्तिद्वयात्मकैकताविति सुवचत्वात् मिथ्यात्वाभावा
धिकरणात्मकसत्त्वसत्त्वमिति चेत् एकत्वाभावो व्यक्तिद्वयात्मकोऽद्वित्वमित्य
प्युच्यताम् प्रत्येकमेकत्वेऽपि पृथ्वीजलयोर्न गन्ध इतिवदुभयत्वैकमिन्नस्य सर्व
जनसिद्धत्वात् यापि तदात्मनोऽभेदप्रतिपादकश्रुतिर्यमः सोऽपि निर्दुःखत्वादिना सा
म्यं प्रतिपादयति संपद्याधिक्ये ऐश्वर्ये तादृशमानासक्तः इतिवत् अत एव निरञ्जनः
परमं साम्यमुपैति इति श्रूयते ईश्वरोऽपि नज्ञानस्वरूपात्मा विज्ञः ज्ञानाद्याश्रयः

चेतनायाः प्रकृतेः कार्यित्वाद्बुद्धेरचेतनत्वे कार्यकारणयोस्तादात्म्यादिति चेन्न
असिद्धेः कर्तृजन्यत्वे मानाभावात् वीतरागजन्मादर्शनादनादित्वं अनादे
र्नाशासंभवान्नित्यत्वं तर्हि प्रकृत्यादिकल्पनेन न च प्रकृतेः क्रियमाणानि गु
णैः कर्माणि सर्वशः अहंकारविमूढात्मा कर्ताहमिति मन्यत इत्यनेन विरोध
इति वाच्यम् प्रकृतेरदृष्टस्य गुणैरदृष्टजन्यैरित्यादिभिः कर्ताहमेव तत्स्यतद
र्थत्वात् तत्रैवं सति कर्तारमात्मानं केवलं तु यः पश्यत्यादि वदता भगवता प्रकटी
कृतोऽयमुपरिष्टाद्दाशयः इति संक्षेपः धर्माधर्माश्रय आत्मेत्यनुषज्यते
शरीरस्य तदाश्रयत्वे देहान्तरकृतकर्मणां देहान्तरभोगानुपपत्तेः ऽध्यक्षः वि
शेषगुणयोगतः योग्यविशेषगुणस्य ज्ञानसुखादेः संबन्धेन आत्मनः प्रत्य
क्षत्वं भवति न त्वन्यथा अहं करोमीत्यादिप्रतीतेः केवलात्मविषयकप्रतीतेर

न्या॰
मु
२७

ननु भवान् प्रत्यक्षत्वाद्यनुमेयोयम् आत्मा परदेहादौ प्रवृत्त्यादिनानुमीयते प्रव
त्तिरूपचेष्टाज्ञानेच्छाप्रयत्नानां देहे अभावस्यावश्यापत्तेश्चेष्टायाश्च प्रयत्न
साध्यत्वाच्चेष्टया प्रयत्नवानात्मानुमीयते इति भावः अत्र दृष्टान्तमाह रथ
गत्येव सारथिः यद्यपि रथकर्म चेष्टा न भवति तथापि तेन कर्मणा सारथि
यथानुमीयते तथा चेष्टात्मकेन कर्मणा परात्मा अनुमीयत इति भावः अहं
कारस्याश्रयोयं अहंकारोहमिति प्रत्ययस्तस्याश्रयो विषयः आत्मा न श
रीरादिरिति मनोमात्रस्य गोचरः मनोभिन्नेन्द्रियजन्यप्रत्यक्षाविषयः मान
सप्रत्यक्षविषयश्चेत्यर्थः रूपाद्यभावेनेन्द्रियान्तरायोग्यत्वात् विभुर्बुद्ध्यादि
गुणवान् विभुत्वं परममहत्त्वं तच्च पूर्वमुक्तमपि स्पष्टार्थमुक्तं बुद्ध्यादिगुण
वानिति बुद्धिः सुखदुःखेच्छाद्वेषप्रयत्नादयश्चतुर्दशात्मगुणाः पूर्वमुक्ता वेदितव्याः ॥

अत्रैव प्रसंगात् कतिपयं बुद्धेः प्रपंचं दर्शयति बुद्धिस्तु द्विविधा मता द्वैविध्यं
मुत्पादयति अनुभूतिः स्मृतिश्च स्यादनुभूतिश्चतुर्विधा अनुभवत्वस्मृत
ज्ञानत्वं स्मृतित्वं जातिविशेषः स्मरामीत्यनुव्यवसायादिसिद्धमिति अ
नुभवत्वं जातिरित्यपि केचित् प्रत्यक्षमप्यनुमितिस्तथोपमितिः शाब्दजे
एतासां चतसृणां करणानि चत्वारि प्रत्यक्षानुमानोपमानशाब्दाः प्रमा
णानीति सूत्रोक्तानि वेदितव्यानि तत्र इंद्रियजन्यज्ञानं प्रत्यक्षं यद्यपि रूपें
द्रियजन्यं सर्वमेव ज्ञानं तथापींद्रियत्वेन रूपेणेंद्रियाणां यज्ज्ञाने करणत्व
तत्प्रत्यक्षमिति विवक्षितम् ईश्वरप्रत्यक्षं तु न लक्ष्यं इंद्रियार्थसन्निकर्षोत्प
न्नमव्यपदेश्यमव्यभिचारिव्यवसायात्मकं प्रत्यक्षमिति सूत्रे तथैवोक्तत्वात्
अपवादाज्ञानाकरणं ज्ञानं प्रत्यक्षं अनुमितौ व्याप्तिज्ञानस्य उपमितौ सादृश्य

न्या॰ मु॰

ज्ञानस्य स्मृतावनुभवस्य करणत्वात्तत्रातिव्याप्तिः इदं लक्षणमीश्वरप्रत्यक्ष
साधारणं परामर्शजन्यज्ञानमनुमिति यद्यपि परामर्शप्रत्यक्षादिकं परामर्शजन्यं
तथापि परामर्शजन्यहेतुविषयकं ज्ञानमनुमिति न च कादाचित्कहेतुवि
षयकानुमितावव्याप्तिरिति वाच्यं तादृशज्ञानवृत्त्यनुभवत्वव्याप्यजातिमत्त्व
२८ स्य विवक्षितत्वात् अथवा व्याप्तिज्ञानकरणकं ज्ञानमनुमिति एवं सादृश्यज्ञा
नकरणकं ज्ञानमुपमिति पदज्ञानकरणकं ज्ञानं शाब्दबोधः वस्तुतो यां कां
चिदनुमितिव्यक्तिमादाय तद्व्यक्तिवृत्तिजातिमत्त्वमनुमितित्वम् एवं यत्किं
चित्प्रत्यक्षत्वादिकमादाय तद्व्यक्तिवृत्त्यनुमित्यवृत्तिजातिमत्त्वं प्रत्यक्षत्वादिकं
वाच्यमिति जन्यप्रत्यक्षं विभजते घ्राणजादिप्रभेदेन प्रत्यक्षं षड्विधमतम्
घ्राणजं रासनं चाक्षुषं स्पार्शनं श्रौत्रं मानसमिति षड्विधं प्रत्यक्षं न चेश्वर

रण्रत्पन्नस्याविभजनान्मूनत्वं जन्यप्रत्यक्षे सैव निरूपणीयत्वात् उक्तसह्वा
नुसारात् घ्राणस्यगोचरेयगंधोगंधत्वादिरपिस्मृतः गोचर इतिग्राह्य इत्य
र्थः गंधत्वादिरित्यादिपदात्सुरभित्वादेपरिग्रहः गंधस्यप्रत्यक्षत्वात्तद्वृत्ति
रपिप्रत्यक्षा गंधाश्रयग्रहणेनतुघ्राणस्यासामर्थ्यमितिबोध्यम् तथारसोप
लब्धायास्तथाप्राबोधापिचसंमतः रसत्वादिसहित इत्यर्थः तथाप्राबद्धत्वादि
सहितः गन्धोरसश्चउद्भूतोबोध्यः उद्भूतरूपंनयनस्यगोचरोद्रव्याणित
द्वंतिपृथक्त्वसंख्ये विभागसंयोगपरत्वापरत्वस्नेहद्रवत्वंपरिमाणयुक्तं
क्रियाजातियोग्यवृत्तिः समवायश्चताहृशः ग्रीष्मोष्मादावनुद्भूतरूपमिति
ननत्प्रत्यक्षं तद्वति उद्भूतरूपवति योग्यपति पृथक्त्वादिकमपियोग्यव्यक्ति
वृत्तिबोध्यं नातिप्रायोग्यव्यक्तिवृत्तिः चक्षुर्योग्यत्वमेवकथंतदाह गृह्णाती

मा॰
मु॰
२९

ति चक्षुःसंबंधादालोकोद्भूतरूपयोः आलोकसंयोगउद्भूतरूपं च चाक्षुषप्र
त्यक्षे कारणं तत्र द्रव्यचाक्षुषप्रतीतियोः समवायसंबंधेन कारणत्वं द्रव्यसमवे
तरूपादिप्रत्यक्षे स्वाश्रयसमवायसंबंधेन द्रव्यसमवेतसमवेतस्य रूपत्वादेः
प्रत्यक्षे स्वाश्रयसमवेतसमवायसंबंधेनेति उद्भूतस्पर्शवद्द्रव्यं गोचरः सोपि
च त्वचः सोपि उद्भूतस्पर्शोपि स्पर्शत्वादिसहितः रूपान्यच्चक्षुर्योग्यम
रूपभिन्नं रूपत्वादिभिन्नं च यच्चक्षुषो योग्यं तत्त्वगिंद्रियस्यापि ग्राह्यं तथा च
पृथक्त्वसंख्यादयो ये चक्षुर्ग्राह्या गुणा उक्ताः एवं क्रिया जाति योग्यवृत्तयः
त्वचो ग्राह्या इति रूपमत्रापि कारणं द्रव्याध्यक्षे अत्रापि त्वगिंद्रियजन्यद्रव्य
प्रत्यक्षमात्रे न रूपं कारणं तथा च बहिरिंद्रियजन्यद्रव्यप्रत्यक्षे रूपं कारण
मिति नवीनास्तु बहिरिंद्रियजन्यद्रव्यप्रत्यक्षमात्रे न रूपं कारणं प्रमाणा

२९

भावात् किंतु चाक्षुषप्रत्यक्षे रूपस्य स्पार्शनप्रत्यक्षे स्पर्शः कारणं अन्वयव्यति
रेकात् बहिरिंद्रियजन्यद्रव्यप्रत्यक्षमात्रे किंकारणमिति चेन्न किंचित् आत्मा
वृत्तिशब्दभिन्नविशेषगुणवत्वं वा प्रयोजकमस्तु रूपस्य कारणत्वे लाघव
मिति चेन्न वायोस्त्वगिंद्रियेणाग्रहणप्रसंगात् इष्टापत्तिरिति चेन्न उद्भूतस्प
र्श एव लाघवात्कारणमस्तु प्रभाया अप्रत्यक्षत्वे इष्टापत्तिरेव किन्न स्यात्
तस्माद्भूमिं पश्यामीतिवत् वायुं स्पृशामीति प्रत्ययसंभवाद्द्वयोरपि प्रत्यक्षत्वं भ
वत्येव बहिर्द्रव्यप्रत्यक्षमात्रे न रूपस्य न वा स्पर्शस्य हेतुत्वं वायुप्रभयोरेक
त्वं गृह्यत एव क्वचित् द्वित्वादिकमपि क्वचित् संख्यापरिमाणग्रहे दोषा
दिसाक्षः त्वचा योगो मनसा ज्ञानकारणं त्वङ्मनःसंयोगो ज्ञानसामान्ये का
रणमित्यर्थः किंत्वप्रमाणं सुषुप्तिकाले न च तस्यां का पुरीतति वर्तमानेन

न्या॰
मु॰
२॰

मनसा ज्ञानाजननमिति ननु सुषुप्तिकाले किं ज्ञानं भवेष्युति अनुभवरूपं स्मर
णरूपं वा नाद्यः अनुभवसामग्र्यभावात् तथा हि प्रत्यक्षे चक्षुरादिना मनःसं
योगस्य हेतुत्वात्तदभावादेव न चाक्षुषादिप्रत्यक्षं ज्ञानादेरभावादेव मानस
प्रत्यक्षज्ञानाद्यभावेन आत्मनोऽपि न प्रत्यक्षमिति व्याप्तिज्ञानाभावादेव नानुमि
तिः सादृश्यज्ञानाभावान्नोपमितिः पदज्ञानाभावान्न शाब्दबोधः इत्यनुभव
सामग्र्यभावान्नानुभवः उद्बोधकाभावाच्च न स्मरणम् एवं सुषुप्तिप्राक्का
लोत्पन्नेच्छादिव्यक्तेरुत्संबंधेनात्मनः प्रत्यक्षत्वप्रसंगात् नाद्यतींद्रिय
त्वेमानाभावात् सुषुप्तिप्राक्काले निर्विकल्पकमेवानियमेन जायत इत्य
त्रापि प्रमाणाभावात् अप्यज्ञानमावित्वऽन्नः संयोगस्य यदि कारणं
त्वं तदा तस्मिन् चाक्षुषादिप्रत्यक्षकाले त्वाच प्रत्यक्षस्यात् विषयत्वकस् २॰

योगस्यत्वङ्मनःसंयोगस्यचसत्वात् परस्परप्रतिवंधादेकमपिनस्या
दिति ग्रन्थेकेचित् पूर्वोक्तयुक्त्यात्वङ्मनःसंयोगज्ञानहेतुत्वेसिद्धे चाक्षुषा
दिसामग्र्याःस्पार्शनादिप्रतिबंधकत्वमनुभवानुरोधात्कल्प्यत इति ग्र
न्थेतुसुषुप्त्यनुरोधेनचर्ममनःसंयोगस्यज्ञानहेतुत्वेकल्प्येचाक्षुषादिप्र
त्यक्षकालेत्वङ्मनःसंयोगाभावान्नत्वाचप्रत्यक्षमिति मनोग्राह्यंसुखं
दुःखमिच्छाद्वेषोमतिःकृतिः मनोजन्यप्रत्यक्षविषयमित्यर्थः मतिर्ज्ञा
नं कृतिर्यत्नः एवंसुखत्वदुःखत्वादिकमपिमनोग्राह्यं एवमात्मापिम
नोग्राह्यः किंतुमनोमात्रस्यगोचरः इत्यनेनपूर्वमुक्तत्वादिह नोक्तं ज्ञान
यन्निर्विकल्पाख्यंतदतीन्द्रियमिष्यते चक्षुःसंयोगाद्यनंतरं घट इत्याका
रकं घटत्वादिविशिष्टज्ञानंनसंभवतिपूर्वंविशेषणस्यघटत्वादेर्ज्ञानाभा

वात् विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वात् तथा च प्रथमतो घट घट
त्वयोः वैशिष्ट्यानवगाह्येव ज्ञानं जायते तदेव निर्विकल्पकं तच्च न प्रत्यक्षं
तथाहि वैशिष्ट्यानवगाहिज्ञानस्य प्रत्यक्षत्वं न भवति घटमहं जानामी
ति प्रत्ययात् तत्रात्मनि ज्ञानं प्रकारीभूय भासते ज्ञाने घटस्तत्र घटत्वं प्र
कारो यः स एव विशेषणमित्युच्यते विशेषणे यद्विशेषणं तद्विशेषण
तावच्छेदकमित्युच्यते विशेषणतावच्छेदकप्रकारकं ज्ञानं विशिष्टवैशि
ष्ट्यज्ञाने कारणम् निर्विकल्पके च घटत्वादिन प्रकारत्वेन घटत्वादिवि
शिष्टघटादिवैशिष्ट्यभानं ज्ञाने न संभवति घटत्वाद्यप्रकारकं च घटा
दिविशिष्टज्ञानं न संभवति जात्यतिरिक्तपदार्थज्ञानस्य किंचिद्धर्मप्रका
रकत्वनियमात् महत्त्वषड्विधे हेतुः द्रव्यप्रत्यक्षे महत्त्वं समवायस्

त्व

वंधेन कारणं द्रव्यसमवेतानां गुणकर्मसामान्यानां प्रत्यक्षे स्वाश्रयसमवायसंवं
धेन द्रव्यसमवेतसमवेतानां गुणकर्मत्वादीनां प्रत्यक्षे स्वाश्रयसमवेतसमवाय
संबंधेन कारणमिति इंद्रियं करणमुक्तं विषयेंद्रियसंबंधो व्यापारः सोपि षड्विधः
अग्रेपि षड्विध इत्यनुसंधेयं इंद्रियत्वं न जातिः पृथिवीत्वादिना सांकर्यात् इं
द्रियत्वं तु शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयो
गाश्रयत्वं आत्मादिवारणाय सत्यंतं उद्भूतविशेषगुणस्य श्रोत्रे सत्त्वाच्छब्देत
रेति विशेषगुणस्य रूपादेश्चक्षुरादावपि सत्त्वादुद्भूतेति उद्भूतत्वं न जातिः शु
क्लत्वादिना सांकर्यात् नच शुक्लत्वादिव्याप्यनानैवोद्भूतत्वमिति वाच्यं उद्भूत
रूपत्वादिना चाक्षुषादौ जनकत्वानुपपत्तेः किंतु शुक्लत्वादिव्याप्यनानैवानु
द्भूतत्वं तदभाववत्स्पर्शोद्भूतत्वं नत्वक्संयोगादावव्याप्तिः तथाच शब्देतरोद्भूत

न्या. मु.

गुणाः संयोगादिश्चक्षुरादावप्युत्पन्नो विशेषेति कालादिकारणायु विशेषादृत्तं
इन्द्रियावयवविषयसंयोगस्यापि प्राचांमते प्रत्यक्षजनकत्वादिन्द्रियावयववा
रणाय नवीनमते कालादेरूपाभावप्रत्यक्षसन्निकर्षघटकतयाकारणीभूत
चक्षुःसंयोगाश्रयस्य कालादेर्वारणाय मनःपदे [illegible]ज्ञानकारणमित्यपि पतद्वारणा
३२ य करणमिति व्यापारवत् असाधारणं कारणं करणं व्यापारः सन्निकर्षः ष
ड्विधसन्निकर्षमुदाहरणद्वारा प्रदर्शयति द्रव्यग्रहस्तु संयोगात्संयुक्तसमवाय
तः द्रव्येषु समवेतानां तथा तत्समवायतः तत्रापि समवेतानां शब्दस्य समवायतः
तद्वृत्तीनां समवेतसमवायेन तु ग्रहः विशेषणतया तद्वद्भावानां ग्रहो भवेत् यदि
स्यादुपलभ्येतेत्येवं यत्र प्रसज्यते प्रत्यक्षसमवायस्य विशेषणतया भवेत् द्रव्यप्र
त्यक्षमिन्द्रियसंयोगजन्यं द्रव्यसमवेतप्रत्यक्षं इन्द्रियसंयुक्तसमवायजन्यं एवम

गेऽपि वस्तुतस्तु द्रव्यचाक्षुषं प्रति चक्षुःसंयोगः कारणं द्रव्यसमवेतचाक्षुषं प्रति चक्षुः
संयुक्तसमवायः कारणं द्रव्यसमवेतसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवेतसमवायः
एवमन्यत्रापि विशिष्यैव कार्यकारणभावः परन्तु पृथिवीपरमाणुनीले नीलत्वं पृथि
वीपरमाणौ पृथिवीत्वं च चक्षुषा कथं न गृह्यते तत्र परम्परया उद्भूतरूपसंबंधस्य मह
त्त्वसंबंधस्य च सत्त्वात् तथाहि नीलत्वं जातिरेकैव घटनीले परमाणुनीले च वर्त्तते तथा
च महत्त्वसंबंधो घटनीलमादाय वर्त्तते उद्भूतरूपसंबंधश्च उभयमादायैव वर्त्तते ए
वं पृथिवीत्वेऽपि घटादिकमादाय महत्त्वसंबंधो बोध्यः एवं वायौ न तदीयस्पर्शादौ च
सत्तायाश्चाक्षुषमापत्तिः स्यात् तस्मादुद्भूतरूपावच्छिन्नमहत्त्वावच्छिन्नचक्षुःसंयुक्त
समवायस्य द्रव्यसमवेतचाक्षुषे तादृशचक्षुःसंयुक्तसमवेतसमवायस्य द्रव्यसमवे
तसमवेतचाक्षुषे कारणत्वं वाच्यम् इत्थं च परमाणुनीलादौ न नीलत्वादिग्र

सा० मु० ३३

हः परमाणौ चक्षुःसंयोगस्य महत्त्वावच्छिन्नत्वाभावात् एवं वाय्वादौ न सत्त्वादि चाक्षुषं तत्र चक्षुःसं
योगस्य रूपावच्छिन्नत्वाभावात् एवं यत्र घटस्य पृष्ठावच्छेदेन आलोकसंयोगः चक्षुःसंयो
गस्तु अग्रावच्छेदेन तत्र घटप्रत्यक्षाभावादालोकसंयोगावच्छिन्नत्वं चक्षुःसंयोगे विशेषणं दे
यं एवं द्रव्यस्पार्शनप्रत्यक्षे त्वक्संयोगः कारणं द्रव्यसमवेतस्य स्पार्शनप्रत्यक्षे त्वक्सं
युक्तसमवायः द्रव्यसमवेतसमवेतस्य स्पार्शप्रत्यक्षे त्वक्संयुक्तसमवेतसमवायः अत्रा
पि महत्त्वावच्छिन्नत्वं उद्भूतस्पर्शावच्छिन्नत्वं च पूर्ववदेव बोध्यम् एवं गन्धप्रत्यक्षे घ्राण
संयुक्तसमवायः गंधसमवेतस्य घ्राणजप्रत्यक्षे घ्राणसंयुक्तसमवेतसमवायः रास
नप्रत्यक्षे रसनासंयुक्तसमवायः रससमवेतस्य रासनप्रत्यक्षे रसनासंयुक्तसमवेत
समवायः कारणं शब्दप्रत्यक्षे श्रोत्रावच्छिन्नसमवायः शब्दसमवेतश्रावणप्रत्य
क्षे श्रोत्रावच्छिन्नसमवेतसमवायकारणं अत्र सर्वप्रत्यक्षे लौकिकं बोध्यम् व

त्यमाणमलौकिकप्रत्यक्षं इंद्रियसंयोगादिकं विनापि भवति एवमात्मानःप्रत्यक्षे
मनःसंयोगः आत्मसमवेतमानसप्रत्यक्षे मनःसंयुक्तसमवायः आत्मसमवेतसमवेत
मानसप्रत्यक्षे मनःसंयुक्तसमवेतसमवेतसमवायः कारणं अभावप्रत्यक्षे समवाय
प्रत्यक्षे च इंद्रियसंबद्धविशेषणताहेतुः वैशेषिकमते समवायो न प्रत्यक्षः अत्र यद्य
पि विशेषणता नानाविधा तथाहि भूतलादौ घटाद्यभावः संयुक्तविशेषणतया
गृह्यते संख्यादौ रूपाद्यभावः संयुक्तसमवेतविशेषणतया संख्यात्वादौ रूपा
द्यभावः संयुक्तसमवेतसमवेतविशेषणतया शब्दाभावः केवलश्रोत्रावच्छिन्न
विशेषणतया कादौ खत्वाद्यभावः श्रोत्रावच्छिन्नसमवेतविशेषणतया एवं के
त्वादौ खत्वाद्यभावः श्रोत्रावच्छिन्नसमवेतसमवेतविशेषणतया एवं कत्वावच्छि
न्नाभावे खत्वाभावादिकं विशेषणविशेषणतया घटाभावादौ घटाद्यभावः

न्यां
मु

३४

संयुक्तविशेषणतया एवमन्यदप्यूह्यं तथापि विशेषणतात्वेनैकैव सा गण्यते अ
न्यथा षोढासंनिकर्षे इति प्राचां प्रवादो व्याहन्येतेति यदि स्यादुपलभ्येतेत्येवं यत्र प्रस
ञ्जन इति अत्राभावप्रत्यक्षे योग्यानुपलब्धिः कारणं तथा हि भूतलादौ घटादिज्ञा
ने जाते घटाभावादिकं न ज्ञायते तेनाभावोपलंभे प्रतियोग्युपलंभाभावः कार
णं तत्र योग्यतापि अपेक्षिता सा च प्रतियोगिसत्त्वप्रसंजनप्रसंजितप्रतियोगिकत्व
रूपा तदर्थश्च प्रतियोगिनो घटादेः सत्त्वप्रसक्त्या प्रसंजित उपलंभरूपः प्र
तियोगी यस्य स उपलंभाभावोऽभावप्रत्यक्षे हेतुः तथा हि यत्रालोकसंयोगा
दिकं वर्तते तत्र यद्यत्र घटः स्यात्तर्हि उपलभ्येतेत्यापादयितुं शक्यते तत्र घटाभा
वादेः प्रत्यक्षं भवति अन्धकारे तु नापादयितुं शक्यते तेन घटाभावादेरन्धकारे न
चाक्षुषप्रत्यक्षं स्पार्शनप्रत्यक्षं तु भवत्येव आलोकसंयोगं विनापि स्पार्शनप्रत्य

७

तस्यापादयितुमशक्यत्वात् गुरुत्वादियदयोग्यं तदभाववत्तु न योग्यः ननु गुरुत्वादिप्र
त्यक्षस्यापादयितुमशक्यत्वात् वायौ उद्भूतरूपाभावः पाषाणे सौरभाभावः गुडे तिक्ता
भावो वह्नावनुष्णत्वाभावः श्रोत्रे शब्दाभावः आत्मनि सुखाद्यभावः एवमादयस्तु नं दि
न्द्रियेण गृह्यंते तत्तत्प्रत्यक्षस्यापादयितुमशक्यत्वात् संसर्गाभावप्रत्यक्षे प्रतियोगिनो योग्य
ग्यता अन्योन्याभावप्रत्यक्षे अधिकरणयोग्यता पेक्षिता अतः स्तंभादौ पिशाचादिभेदोपि
चक्षुषा गृह्यत एव प्रत्यक्षं लौकिकालौकिकभेदेन द्विविधं तत्र लौकिकप्रत्यक्षे षोढा
सन्निकर्षो वर्णितः अलौकिकसन्निकर्षस्तु पुनः उच्यते अलौकिकव्यापारस्त्रिविधः
परिकीर्तितः सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथेति व्यापारः सन्निकर्षः सामान्य
लक्षण इति सामान्यं लक्षणं यस्येत्यर्थः तत्र लक्षणपदेन यदि स्वरूपमुच्यते तदा साम
न्यस्वरूपाप्रत्यासत्तिरित्यर्थो लभ्यते तच्चेंद्रियसंबद्धविशेष्यकज्ञाने प्रकारीभूतं बोध्यम्
तथाहि यत्रेंद्रियसंयुक्तो धूमादिस्तद्विशेष्यकं धूम इति ज्ञानं यज्जातं तत्र ज्ञाने धू

मा॰
मु॰
७१

मत्वंप्रकारः तत्र धूमत्वेनसन्निकर्षेण धूमा इत्येवंरूपं सकलविषयकंज्ञानंजायते ॥ अत्र
चेयदि इंद्रियसंबद्धमित्येवोच्यते तदा धूलीपटले धूमभ्रमानंतरं सकलधूमविषयकंज्ञा
नंनस्यात् तत्र धूमत्वेनसह इंद्रियसंबंधाभावात् मन्मते तु इंद्रियसंबद्धं धूलीपटलंतद्वि
शेष्यकंधूम इतिज्ञानंतत्प्रकारीभूतंधूमत्वंप्रत्यासत्तिः इंद्रियसंबंधश्च लौकिकोग्राह्यः
इदंचबहिरिंद्रियस्थले मानसस्थले तु ज्ञाने प्रकारीभूतं सामान्यं प्रत्यासत्तिः परं तु समानानां
भावः सामान्यं तच्च क्वचिन्नित्यं धूमत्वादिः क्वचिदनित्यं घटादिः यत्रैको घटः संयोगे
न भूतले समवायसंबंधेन कपाले वा ज्ञातः तदनंतरं सर्वेषामेव तत्तद्घटवतां भूतलादीनां कपा
लादीनां वा ज्ञानं भवति तत्रेदं बोध्यं परं तु सामान्यरूपेण संबंधेन ज्ञायते तेन संबंधेन धर्मिकर
णानां प्रत्यासत्तिः किंतु यत्र तत्र घटनाशानंतरं तत्तद्घटवतः स्मरणं जातं तत्र सामान्यलक्ष
णया सर्वेषां तत्तद्घटवत्ताभानं न स्यात् सामान्यस्य तदानीमभावात् किंतु इंद्रियसंबद्ध

७१

विशेष्यकं घट इति ज्ञानं यत्र जातं तत्र द्वितीये इन्द्रियसंबंधं विनापि ताद्दृशज्ञानप्रकारीभूत
सामान्यस्यैकत्वात् ताद्दृशज्ञानं कुतो न जायते तस्मात्सामान्यज्ञाने प्रमाणं तन्नि ननु सामा
न्यमित्याह आसत्तिराश्रयाणांतु सामान्यज्ञानमिष्यते इति आसत्तिः प्रत्यासत्तिरित्यर्थः त
स्याच सामान्यलक्षणेत्यनेन लक्षणशब्दस्य विषयोर्थः तेन सामान्यविषयकज्ञानं प्रत्यास
त्तिरित्यर्थो लभ्यते ननु चक्षुः संयोगादिकं विनापि सामान्यज्ञानं यत्र वर्त्तते तत्र सकलघटा
दीनां चाक्षुषप्रसंगस्तस्मादुक्तं आह तदिन्द्रियजतद्धर्मबोधसामग्र्यपेक्ष्यते अस्यार्थः यदा बहि
रिन्द्रियेण सामान्यलक्षणया ज्ञानं जननीयं तदा यत्किंचिद्धर्मिणि तत्सामान्यस्य तदिन्द्रिय
जन्यज्ञानस्य सामग्र्यपेक्षिता सा च सामग्री चक्षुः संयोगालोकसंयोगादिकम् तेनांध
कारादौ चक्षुरादिना ताद्दृशज्ञानं न जन्यते ननु ज्ञानलक्षणा प्रत्यासत्तिर्यदि ज्ञानरूपा सा
मान्यलक्षणापि ज्ञानरूपा तदा नयोर्भेदो न स्यादत आह विषयीयस्य तस्यैव व्यापारो ज्ञा
नलक्षणा इति सामान्यलक्षणा प्रत्यासत्तिर्हि तदाश्रयस्य ज्ञानजनने ज्ञानलक्षणा

न्या॰ मु॰

३८

प्रत्यासत्तिर्यत्रेन्द्रियसंबद्धविषयकं ज्ञानं तस्यैव प्रत्यासत्तिः अयमर्थः प्रत्यक्षे सन्निकर्षं विना भानं
न संभवति तथा च सामान्यलक्षणां विना धूमत्वेन सकलधूमानां वह्नित्वेन सकलवह्नीनां
च भानं कथं भवेत् तदर्थं सामान्यलक्षणा स्वीक्रियते न च सकलवह्निधूमभानाभावे का क्षति
रिति वाच्यम् प्रत्यक्षे धूमे वह्निसंबंधस्य गृहीतत्वात् अन्यधूमस्य चानुपस्थितत्वात् धूमो
वह्निव्याप्यो न वेति संशयानुपपत्तेः मन्मते तु सामान्यलक्षणया सकलधूमोपस्थितौ कालां
तरीयदेशांतरीयधूमे वह्निव्याप्यसंदेहः संभवति न च सामान्यलक्षणास्वीकारे प्रमेयत्वेन
सकलप्रमेयज्ञाने जाते सार्वज्ञ्यापत्तिरिति वाच्यं प्रमेयत्वेन सकलप्रमेयज्ञाने जातेपि वि
शिष्य सकलपदार्थानामज्ञातत्वेन सर्वज्ञत्वाभावात् एवं ज्ञानलक्षणा यापि स्वीकार्या सुर
भिचंदनमिति ज्ञाने सौरभस्य भानं कथं स्यात् यद्यपि सामान्यलक्षणयापि सौरभस्य ज्ञानं
संभवति तथापि सौरभत्वस्य भानं ज्ञानलक्षणया एवं यत्र धूमत्वेन धूलीपटलज्ञानं तत्र
धूलीपटलस्यानुव्यवसाये भानं ज्ञानलक्षणया योगजो द्विविधः युक्तो युंजानः

३१

भेदत इति योगाभ्यासजनितो धर्मविशेषः श्रुतिपुराणादिप्रतिपाद्य इत्यर्थः युक्त
युंजानरूपयोगिद्वैविध्याद्धर्मस्यापि द्वैविध्यमिति भावः युक्तस्य सर्वदा भानं चिंतासह
कृतोपरः युक्तस्य तावद्योगजधर्मसहायेन मनसा आकाशपरमाण्वादिनिखिल
पदार्थगोचरं ज्ञानं सर्वदैव भवितुमर्हति द्वितीयस्य चिंताविशेषोपि सहकारीति ।।
इति श्रीविश्वनाथपंचाननभट्टाचार्यविरचितायां सिद्धांतमुक्तावल्यां प्रत्यक्षखंडः
अनुमितिं व्युत्पादयति व्यापारस्तु परामर्शः करणं व्याप्तिधीर्भवेत् अनुमायां
अनुमितौ व्याप्तिज्ञानं करणं परामर्शो व्यापारः तथाहि येन पुरुषेण महानसा
दौ धूमे वह्नेर्व्याप्तिर्गृहीता पश्चात् स एव पुरुषः क्वचित् पर्वतादौ अविच्छिन्न
मूलां धूमरेखां पश्यति तदनंतरं धूमो वह्निव्याप्य इत्येवंरूपव्याप्ति
स्मरणं तस्य भवति तत्पश्चाद्वह्निव्याप्यधूमवानयमिति ज्ञानं भवति सएव

न्या
मु

वपरामर्श इत्युच्यते तदनंतरं पर्वतोयं वह्निमानिति ज्ञानं जायते तदेवानुमितिः अत्रा
चीनास्तु व्याप्यत्वेन ज्ञायमानं धूमादिकं लिंगमनुमितिकरणं वदंति तद्दूषयति ज्ञायमा
नमिति ज्ञायमानलिंगं तु करणं न हि लिंगस्यानुमित्यकरणत्वे युक्तिमाह अनागता
दिलिंगेन न स्यादनुमितिस्तदा यद्यनुमितौ लिंगं करणं स्यात्तदा अनागतेन विनष्टेन
37 वा लिंगेन अनुमितिर्न स्यात् अनुमितिकरणस्य लिंगस्य तदानीमभावादिति व्याप्य
स पक्षवृत्तित्वधीः परामर्श उच्यते व्याप्तिविशिष्टस्य पक्षेण सह वैशिष्ट्यावगाहि ज्ञा
नमनुमितौ जनकं तत्र व्याप्यः पक्ष इति ज्ञानं पक्षो व्याप्यवानिति वा ज्ञानं अनुमि
तिस्तु पक्षे व्याप्य इति ज्ञानात् पक्षः साध्यमित्याकारिका पक्षो व्याप्यवानिति ज्ञानात्
पक्षः साध्यवानित्याकारिका द्विविधादपि परामर्शात् पक्षः साध्यवानित्येव अ
नुमितिरित्यन्ये ननु वह्निव्याप्यधूमवान् पर्वत इति ज्ञानं विनापि यत्र पर्वतो धू

मवानितिप्रत्यक्षं ततो वह्निव्याप्यो धूम इति स्मरणं तत्र ज्ञानद्वयादेवानुमितिर्दर्शनात् व्या
प्तिविशिष्टवैशिष्ट्यावगाहिज्ञानं न सर्वत्र कारणं किंतु व्याप्यतावच्छेदकप्रकारकपक्षध
र्मताज्ञानत्वेन कारणत्वं आवश्यकत्वात् तत्र विशिष्टज्ञानकल्पने गौरवाच्चेति चेन्न व्या
प्यतावच्छेदकाज्ञानेपि वह्निव्याप्यवानिति ज्ञानादनुमित्युत्पत्तेर्लाघवाच्च व्याप्तिप्रकारक
पक्षधर्मताज्ञानत्वेन हेतुत्वं किंच धूमवान् पर्वत इति ज्ञानादनुमित्यापत्तिः व्याप्यता
वच्छेदकीभूतधूमत्वप्रकारकस्य पक्षधर्मताज्ञानस्यासत्वात् न च गृह्यमाणव्याप्यता
वच्छेदकप्रकारकपक्षधर्मताज्ञानस्य हेतुत्वं वाच्यं चैत्रस्य व्याप्तिग्रहे मैत्रस्य पक्षधर्मता
ज्ञानात् अनुमितिः स्यात् यदि तु तत्पुरुषीयगृह्यमाणव्याप्यतावच्छेदकप्रकारकं तत्पुरु
षीयपक्षधर्मताज्ञानं तत्पुरुषीयानुमितौ हेतुरित्युच्यते तदा अनंतकार्यकारणभावः मन्म
तेतु समवायसंबंधेन व्याप्तिप्रकारकपक्षधर्मताज्ञानं समवायेनानुमितिं जनयतीति

न्या॰
मु॰
३८

नेत्यंतं कार्यकारणभावः यदि तु व्याप्तिप्रकारकं ज्ञानं पक्षधर्मताज्ञानं च स्वतंत्रं कारणमित्युच्यते
तदा कार्यकारणभावद्वयं वह्निव्याप्यो धूमः आलोकवान् पर्वत इति ज्ञानादप्यनुमितिः स्यात्
इति इत्थं च यत्र ज्ञानद्वयं तत्रापि विशिष्टज्ञानं कल्पनीयं फलमुखगौरवस्यादोषत्वादिति
व्याप्यो नाम व्याप्त्याश्रयः ननु व्याप्तिः केत्यत आह व्याप्तिः साध्यवदन्यस्मिन्नसंबंध उदा
हृतः वह्निमान्धूमादित्यादौ साध्यो वह्निः साध्यवान्महानसादिः तदन्यो जलह्रदादिः
तदवृत्तित्वं धूमस्येति लक्षणसमन्वयः धूमवान्वह्नेरित्यादौ साध्यवदन्यस्मिन्नयः
पिंडादौ वह्नेः सत्वान्नातिव्याप्तिः अत्र येन संबंधेन साध्यं तेनैव संबंधेन साध्यवान्बोध्यः
अन्यथा समवायसंबंधेन वह्निमान्वह्नेरवयवः तदन्यो महानसादिस्तत्र धूमस्य विद्य
मानत्वादव्याप्तिप्रसंगात् साध्यवदन्यश्च साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेद
वान्बोध्यः तेन यत्किंचिद्वह्निमतो महानसादेर्भिन्ने पर्वतादौ धूमसत्वेपि न क्षतिः

येन संबंधेन हेतुता तेनैव साध्यवदन्यावृत्तित्वं बोध्यं तेन साध्यवदन्यस्मिन् धूमाव
यवे धूमस्य समवायसंबंधेन सत्वेपि न क्षतिः साध्यवदन्यावृत्तित्वं च साध्यवदन्यवृ
त्तित्वत्वावच्छिन्नप्रतियोगिताकाभावः तेन धूमवान् वह्नेरित्यत्र साध्यवदन्यजलह्रदा
दिवृत्तित्वाभावेपि नातिव्याप्तिः अत्र यद्यपि द्रव्यगुणकर्मान्यत्वविशिष्टसत्वादि
त्यादौ विशिष्टसत्तायाः शुद्धसत्तायाश्चैक्यात् साध्यवदन्यस्मिन् गुणादौ वृत्ति
त्वं नास्ति तथापि हेतुतावच्छेदकरूपेणावृत्तित्वं वाच्यं हेतुतावच्छेदकं यत्तत्ता न
वच्छेदकमिति फलितोर्थः ननु केवलान्वयिनि ज्ञेयत्वादौ साध्ये साध्यवदन्यस्याप्र
सिद्धत्वात् अव्याप्तिः किं च सत्तावान् जातेरित्यादौ साध्यवदन्यस्मिन् सामान्यादौ हे
तुतावच्छेदकसंबंधेन समवायेन वृत्तेरप्रसिद्धत्वादव्याप्तिरत आह अथवा हेतुम
न्निष्ठविरहाप्रतियोगिना साध्येन हेतोरैकाधिकरण्यं व्याप्तिरुच्यते हेतुमन्निन

न्या॰ मु॰ ३८ न्या॰ मु॰ ३९

ष्ठावृत्तिर्यस्यस तथाविरहोऽभावः तथा च हेत्वधिकरणवृत्तिर्योभावस्तदप्रति
योगिना साध्येन सह हेतोः सामानाधिकरण्यं व्याप्तिरुच्यते अत्र यद्यपि वह्नि
मान्धूमादित्यादौ हेत्वधिकरणपर्वतादिवृत्त्यभावप्रतियोगित्वं तत्र वह्न्यादे
रस्तीत्यव्याप्तिः न च समानाधिकरणवह्निधूमयोरेवव्याप्तिरितिवाच्यम् तत्र
ह्रदादेरप्युभयाभावसत्वादेकसत्वे द्वयं नास्तीति प्रतीतेः गुणवान्द्रव्य
त्वादित्यादावव्याप्तिश्च तथापि साध्यतावच्छेदकं प्रतियोगितानवच्छेदकं त
दवच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिरितिवाच्यम् ननु तथापि रूपत्व
व्याप्यजातिमद्वान्पृथिवीत्वादित्यादौ साध्यतावच्छेदकः रूपत्वव्याप्यजाति
यस्सा च शुक्लत्वादिरूपजातीनां नीलघटादिवृत्त्यभावप्रतियोगितावच्छे
दकत्वमस्तीत्यव्याप्तिरिति चेन्न तत्र परंपरया रूपत्वव्याप्यजातित्वस्यैवसा ३९

धर्मावच्छेदकत्वात् नहि तादृशधर्मावच्छिन्नाभावः क्वापि प्रसिद्धोस्ति रूप
त्वव्याप्यजातिमन्नास्तीति बुद्ध्यापत्तेः साध्याद्विभेदेन व्याप्तिभेदात् तादृशस्थले
साध्यतावच्छेदकतावच्छेदकं प्रतियोगितावच्छेदकतानवच्छेदकमित्यपि वक्तव्ये
णघटकमित्यपि वदंति हेत्वधिकरणं हेतुतावच्छेदकविशिष्टाधिकरणं वा
च्यं तेन द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादौ शुद्धसत्ताधिकरणे गुणादि
निष्ठाभावप्रतियोगित्वेपि द्रव्यत्वस्य नाव्याप्तिः हेतुतावच्छेदकसंबंधेन हेत्व
धिकरणं वाच्यं तेन कपिसंयोगी एतद्वृक्षत्वादित्यत्र मूलावच्छेदेन तद्वृक्षे क
पिसंयोगाभावप्रतियोगित्वेपि कपिसंयोगस्य नाव्याप्तिः नच प्रतियोगिव्यधि
करणत्वं यदि प्रतियोग्यनधिकरणवृत्तित्वं तदा तथैवाव्याप्तिः प्रतियोगि
नः कपिसंयोगस्यानधिकरणे गुणादौ वर्तते योभावस्तस्यैव वृक्षे मूलावच्छे

त्यां
मनुं
४.

देनसत्वात् यदितु प्रतियोग्यधिकरणावृत्तित्वं तदा संयोगी सत्वादित्यादावति
व्याप्तिः सत्वाधिकरणे गुणादौ यः संयोगाभावस्तस्य प्रतियोग्यधिकरणद्रव्यावृत्ति
त्वादिति वाच्यम् हेत्वधिकरणप्रतियोग्यनधिकरणावृत्तित्वस्यैव विवक्षितत्वात् स्व
प्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्त्यभाव इति निष्कर्षः प्रतियोग्यनधि
करणत्वं च प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं बोध्यं तेन विशिष्ट
सत्तावान् जातेरित्यत्र जात्यधिकरणगुणादेः विशिष्टसत्ताभावप्रतियोगिसत्ता
धिकरणत्वेपि न क्षतिः एवं च साध्यतावच्छेदकसंबंधेन प्रतियोग्यनधिकरण
त्वं बोध्यम् तेन ज्ञानवान् सत्वादित्यादौ ज्ञानाधिकरणघटादेर्विषयतया ज्ञाना
धिकरणत्वेपि न क्षतिः इत्थं च वह्निमान् धूमादित्यादौ धूमाधिकरणे समवायसं
बंधेन वह्निविरहसत्वेपि न क्षतिः ननु प्रतियोगितावच्छेदकावच्छिन्नस्य यस्य

४.

कस्यचिदनधिकरणत्वं तत्सामान्यस्य वा यत्किंचित्प्रतियोगितावच्छेदकावच्छि
न्नानधिकरणत्वं वा विवक्षितम् आद्ये कपिसंयोगी एतद्वृक्षत्वादित्यत्र तथैवा
व्याप्तिः तत्र वृक्षीयकपिसंयोगाभावस्य हि प्रतियोगितावच्छेदकावच्छिन्नो वृक्षा
वृत्तिरपि कपिसंयोगो भवति तदनधिकरणत्वं च वृक्षे द्वितीये तु प्रतियोगिव्य
धिकरणाभावाप्रसिद्धिः सर्वस्यैवाभावस्य एवंलक्षणवृत्तित्वविशिष्टस्वाभावा
त्मकप्रतियोगिसमानाधिकरणत्वात् न च वह्निमान्धूमादित्यादौ घटाभा
वादेः एवंलक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोगिव्यधिकरणत्वं यद्यपि
पर्वतादेस्तथापि साध्यतावच्छेदकसंबंधेन तत्प्रतियोग्यनधिकरणत्वमस्त्ये
वेति कथं प्रतियोगिव्यधिकरणाभावाप्रसिद्धिरिति वाच्यम् घटाभावे याव
त्त्वभावत्वस्य घटाभावात्मकतया घटाभावस्य वह्नेरपि प्रतियोगितदधिकर

न्या मु
४१

णांचपर्वतादीनांक्रमेणप्रतियोगिव्यधिकरणस्याप्रसिद्धत्वात् यदितु घटाभावादौ
वह्न्यभावादिर्भिन्नइत्युच्यते तथापि धूमाभाववान् वह्न्यभावादित्यादावव्याप्तिः
तत्र साध्यतावच्छेदकसंबंधः स्वरूपसंबंधः तेन संबंधेनसर्वेषामेवाभावस्यपूर्व
क्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोग्यधिकरणत्वात् हेत्वधिकरणस्येति
तृतीयेतु कपिसंयोगाभाववान् आत्मत्वादित्यादावव्याप्तिः तत्रात्मवृत्तिःकपिसंयो
गाभावाभावः कपिसंयोगस्तस्य गुणत्वात् प्रतियोगितावच्छेदकं गुणसामान्याभा
वत्वमपितदवच्छिन्नानधिकरणत्वंच हेत्वधिकरणस्यात्मन इति मैवम् यादृ
शप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वंहेतुमतस्तादृशप्रतियोगितान
वच्छेदकत्वस्यविवक्षितत्वात् ननु कालो घटवान् कालपरिमाणादित्यत्रप्रति
योगिव्यधिकरणाभावाप्रसिद्धिः हेत्वधिकरणमहाकालस्यजगदाधारतया

सर्वेषामेवाभावानांसाध्यतावच्छेदकसंबंधेनकालिकविशेषणतयाप्रतियो
ग्यधिकरणवृत्तित्वात् अत्रकेचित् महाकालभेदाविशिष्टघटाभावस्यचप्रति
योगिव्यधिकरणेनमहाकालस्यघटाधारत्वेपि महाकालभेदविशिष्टघटाना
धारत्वात् महाकालेमहाकालभेदाभावात् वस्तुतस्तु प्रतियोगितावच्छेदकर
संबन्धेनप्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्त्यभावप्रतियोगितासा
मान्येयत्संबंधावच्छिन्नत्वयद्धर्मावच्छिन्नत्वोभयाभावः तेनसंबंधेनतद्धर्माव
च्छिन्नस्यतद्धेतुव्यापकत्वंबोध्यम् इत्थञ्च कालो घटवान् कालपरिमाणादि
त्यादौसंयोगसंबंधेन घटाभावप्रतियोगिनोघटस्यानधिकरणहेत्वधिकर
णेमहाकालेवर्तमानएवसंयोगेनघटाभाववत्त्वस्यसत्त्वान्नाव्याप्तिः ननु प्रमेय
वह्निमान्धूमादित्यादौ प्रमेयत्वावच्छिन्नत्वमप्रसिद्धम् गुरुधर्म्मस्यानवच्छेद

मा॰
मु॰
४२

कात्वादिति चेन्न कम्बुग्रीवादिमन्नास्तीति प्रतीत्या कम्बुग्रीवादिमत्वावच्छिन्नप्रतियोगि
ताकत्वविषयीकरणेन गुरुधर्मस्याप्यवच्छेदकत्वस्वीकारात् इति संक्षेपः पक्षतेति
त्वमित्यत्र पक्षतात्वं किं तदाह सिसाधयिषाशून्या सिद्धिर्यत्र नास्ति स पक्षस्तत्र
वृत्तित्वज्ञानादनुमितिर्भवति सिसाधयिषाविरहविशिष्टायाः सिद्धेरभावः प
क्षता तद्वान् पक्षः इत्यर्थः सिसाधयिषामात्रं न पक्षता विनापि सिसाधयिषां घनग
र्जितेन मेघानुमानात् अत एव साध्यसंदेहोऽपि न पक्षता विनापि संदेहं घन
गर्जितेन मेघानुमानात् सिद्धौ सत्यामपि सिसाधयिषासत्वेऽनुमितिर्भव
त्येव अतः सिसाधयिषाविरहविशिष्टत्वं सिद्धौ विशेषणम् तथा च यत्र सि
द्धिर्नास्ति तत्र सिसाधयिषायां सत्यामसत्यामपि पक्षता यत्र सिसाधयिषास्ति
तत्र सिद्धौ सत्यामपि पक्षता यत्र च सिद्धिरस्ति सिसाधयिषा नास्ति न तत्र

पक्षता सिसाधयिषाविरहविशिष्टसिद्धेः सत्वात् ननु यत्र परामर्शानंतरं सि
द्धिस्ततः सिसाधयिषा तत्र सिसाधयिषाकाले परामर्शनाशान्नानुमितिः
यत्र सिद्धिपरामर्शसिसाधयिषाः क्रमेण भवंति तत्र सिसाधयिषाकाले सिद्धे
र्नाशात्प्रतिबंधकाभावादनुमितिः यत्र सिसाधयिषासिद्धिपरामर्शास्त
त्र परामर्शकाले सिसाधयिषैव नास्ति एवमन्यत्रापि सिद्धिकाले परामर्श
काले च न सिसाधयिषा योग्यविभुविशेषगुणानां यौगपद्यनिषेधात्के
षु सिसाधयिषाविरहविशिष्टत्वं सिद्धेर्विशेषणमिति चेन्न यत्र वह्निव्या
प्यधूमवान्पर्वतो वह्निमानिति प्रत्यक्षं स्मरणं वा ततः सिसाधयिषा तत्र
पक्षतासंपन्नये तद्विशेषणस्यावश्यकत्वादिति ग्रंथेस्वो धाम यादृश्यादृ
शसिसाधयिषासत्वे सिद्धिसत्वेपि लिङ्गकानुमितिस्तादृशतादृशसिसाध

सा. मु.

यिषाविरहविशिष्टसिद्ध्यभावस्य लिंगकानुमितौ पक्षता तेन परामर्शसत्त्वेपि य
त्किंचिज्ज्ञानं जायतामितीच्छायामपि नानुमिति वह्निव्याप्यधूमवान्पर्वतो वह्निमा
निति प्रत्यक्षसत्त्वे प्रत्यक्षातिरिक्तं च वह्निज्ञानं जायतामितीच्छायां तु भवत्येव ए
वं धूमपरामर्शसत्त्वे आलोकेन वह्निमनुमिनुयामितीच्छायामपि नानुमितिः सि
४२ षाधयिषाविरहकाले यादृशसिद्धिसत्त्वे नानुमितिस्तादृशसिद्धिविशिष्टत्वं तत
तदनुमितौ प्रतिबंधकावक्तव्या तेन पर्वतस्तेजस्वी पाषाणमयो वह्निमानिति ज्ञा
नसत्त्वेप्यनुमितेर्नैव विरोधः परंतु पक्षतावच्छेदकसमानाधिकरण्येन साध्य
सिद्धावपि तदवच्छेदेनानुमितिदर्शनात् पक्षतावच्छेदकावच्छेदेनानुमितिं प्रति
पक्षतावच्छेदकावच्छेदेन सिद्धिरेव प्रतिबंधकता पक्षतावच्छेदकसमानाधिक
रण्येनानुमितिं प्रति तु सिद्धिमात्रं विरोधिः इदं तु बोध्यम् यत्र पुरुषेण वेति

संशयानंतरं पुरुषत्वव्याप्यकरादिमानिति ज्ञानं तथा सत्याम् अनुमित्सायां पुरुषत्वस्य प्र
त्यक्षेनत्वनुमितिः अतोनुमित्साविरहविशिष्टसमानविषयकप्रत्यक्षसामग्री का
मिनीजिज्ञासादिवत्स्वातंत्र्येण प्रतिबंधिका एवं परामर्शानंतरं विना प्रत्यक्षेछ्छां प
क्षादिप्रत्यक्षानुपपत्तेः प्रत्यक्षेछ्छाविरहविशिष्टानुमितिसामग्री भिन्नविषयकप्र
त्यक्षे प्रतिबंधिकेति संक्षेपः हेतुप्रसंगाद्धेत्वाभासान्विभजते अनैकांतो विरुद्धश्चा
प्यसिद्धः प्रतिपक्षितः कालात्ययापदिष्टश्च हेत्वाभासस्तु पंचधा तल्लक्षणं तु
यद्विषयकत्वेन ज्ञानस्यानुमितिविरोधित्वं तेषां हि व्यभिचारादिविषयकत्वे
न ज्ञानस्यानुमितिविरोधात्ते दोषाः यद्विषयकत्वं च यादृशविशिष्टविषयक
त्वेबोध्यम् तेन बाधभ्रमस्यानुमितिविरोधित्वेपि तत्र पर्वतवह्न्यभाववानिति वि
शिष्टस्याप्रसिद्धत्वादिति न हेतुदोषः न च वह्न्यभावव्याप्यपाषाणमयत्ववानिति
परामर्शकाले वह्निव्याप्यधूमस्याभासत्वं न स्यात् तत्र वह्न्यभावव्याप्यवान्

न्या॰
मु॰
४४

दऽइति विशिष्टस्याप्रसिद्धत्वादिति वाच्यं इष्टापत्तेः अन्यथा बाधस्यानित्यदो
षत्वापत्तेः तस्मात्तत्र वह्न्यभाववद्व्याप्यपाषाणमयत्ववानिति परामर्शकाले
वह्निव्याप्यधूमस्य नाभासत्वं भ्रमादनुमितिरेवं धर्माद्वैहेतुस्तु न दुष्ट इति अस्य
साध्याभाववत्त्वादिकं दोषः तद्वत्त्वं च हेतौ येन केनापि संबंधेनेति नव्याः परे तु य
द्विषयकत्वेन ज्ञानस्यानुमितिविरोधित्वं तद्वत्त्वं हेत्वाभासत्वं सत्प्रतिपक्षे विरो
धिव्याप्त्यादिकमेव न तथा तद्वत्त्वं च हेतौ ज्ञानरूपसंबंधेन नचैवं वह्निमान्धूमा
दित्यादौ बाधभ्रमस्यापि पक्षसाध्याभावविषयकत्वेनानुमितिविरोधात् ज्ञान
रूपसंबंधेन तद्वत्त्वस्यापि सत्त्वात्तद्धेतावपि बाधत्वापत्तिरिति वाच्यं तज्ज्ञा
नेस्य संबंधत्वाकल्पनात् अत्र च सत्प्रतिपक्षव्यवहारे ऽनन्तकल्पनात् तत्र बाधि
तव्यवहारादित्याहुः अनुमितिविरोधित्वं च अनुमितितत्करणान्यतरविरो

धितत्वं तेन व्यभिचारिणा व्याप्तिः दोषग्रस्तानं च यद्वत्तुविषयकं तद्धेतुकानुमितौ
प्रतिबंधकं तेन एकहेतौ व्यभिचारस्तो नेहेत्वंतरेणानुमेयस्यापत्तेः तदभावाव
गाहित्वाच्च व्यभिचारस्यानुमितिविरोधित्वाभावेपि न क्षतिरिति संक्षेपः यादृश
पक्षकसाध्यहेतौ यावंतो दोषास्तावदन्यान्यत्वं तत्रहेत्वाभासत्वं पंचकथनं तु
तत्संभवस्थलाभिप्रायेण आद्यः साधारणस्तु स्यादसाधारणकोपरः तथै
वानुपसंहारी त्रिधा नैकांतिको भवेत् एवं साधारणाद्यन्यान्यत्वं साधारणः सा
ध्यवदन्यवृत्तिः तेन साध्यग्रहप्रतिबंधः क्रियते असाधारणः साध्यासमा
नाधिकरणो हेतुः तेन साध्यासमानाधिकरणग्रहः प्रतिबध्यते शब्दोनि
ह त्यः शब्दत्वादित्यादौ तत्र साधारणः अन्यनुपक्षावृत्तिरसाधारणः सपक्षस्तु नि
श्चितसाध्यवान् इत्थं शब्दो नित्यः शब्दत्वादित्यादौ यदा पक्षे साध्यनिश्चयस्तदाना

न्या० मु०

साधारणं तत्रहेतुर्निश्चयादितिवदंति अनुपसंहारीच अत्यंताभावाप्रतियोगिसाध्यकादिः
अनेनव्यतिरेकव्याप्तिग्रहप्रतिबंधः क्रियते विरुद्धस्तु साध्यव्यापकभूताभावप्रतियोगी
अयंचसाध्याभावग्रहसामग्रीत्वेनप्रतिबंधकः सत्प्रतिपक्षेतुप्रतिहेतुः साध्याभावसा
धकः अत्रहेतुरेक एवेतिविशेषः साध्याभावसाधक एवसाध्यसाधकत्वेन उपन्यस्त इ
४५ त्यप्राप्तिविशेषोपस्थापकत्वाविशेषः सत्प्रतिपक्षः साध्याभावव्याप्यवान् पक्षः अ
गृहीताप्रामाण्यकसाध्यव्याप्यत्वेन उपस्थितिकालीन अगृहीताप्रामाण्यकसाध्या
भावव्याप्यत्वेन उपस्थितिविषय इत्यन्ये अत्रचपरस्पराभावव्याप्यवत्ताज्ञानात्प
रस्परानुमितिप्रतिबंधः फलम् अत्रकेचित् यथा घटाभावव्याप्यवत्ताज्ञानेविद्यमा
नेपि घटचक्षुःसंयोगेसतिघटवत्ताज्ञानंजायते तथाचशंखेसत्यपिपीतत्वाभाव
व्याप्यशंखत्ववत्ताज्ञानेसत्यपिपित्तादिदोषपीतःशंखइतिधीर्जायते एवंकोटिद्वयव्याप्य
दर्शनेपिकोटिद्वयस्यप्रत्यक्षरूपः संशयोभवति तथासत्प्रतिपक्षस्थलेसंशयरूपा

नुमितिर्भवत्येव यत्र एककोटिव्याप्यदर्शनं अत्र अधिकबलवत्तया द्वितीयकोटिभानप्र
तिबंधान्न संशयः फलबलेन च अधिकसमबलभावः कल्पते इति वदंति तन्न तद
भाववद्व्याप्यवत्ताज्ञाने सति तदुपनीतभानविशेषस्याबाधादेरनुदयात् लौकिकसन्नि
कर्षाजन्यदोषाजन्यज्ञानमात्रप्रतिबंधकता लाघवात् ननु उपनीतभानविशेषस्या
बाधे च एवं प्रतिबंधकतागौरवात् तथाच प्रतिबंधकसत्वात्कथमनुमितिः न
हि लौकिकसन्निकर्षस्थले प्रत्यक्षमिव सत्प्रतिपक्षस्थले संशयाकारानुमितिः प्रमा
णोक्ता येनानुमितिभिन्नत्वेनापि विशेषणीयं यत्र कोटिद्वयव्याप्यवत्ताज्ञानं त
त्र उभयत्राप्रामाण्यज्ञानात्संशयः अगृहीताप्रामाण्यकस्यैकविशेषधीमात्रस्य
प्रतिबंधकत्वादिति असिद्धिं विभजते आश्रयासिद्ध्याद्यन्यतमत्वमसि
द्धत्वं पक्षे पक्षतावच्छेदकस्याभावः यत्र काञ्चनमयः पर्वतो वह्निमान् इति सा

न्या॰
मु॰
८८

धेते तत्र पर्वतो न कांचनमय इति ज्ञाने विद्यमाने कांचनमये पर्वते परामर्शप्रतिबं
धः फलम् स्वरूपासिद्धिस्तु पक्षे व्याप्यत्वाभिमतस्याभावः एवं च ह्रदो द्रव्यं धूमादित्या
दौ पक्षे व्याप्यत्वाभिमतस्य हेतोरभावज्ञाने पक्षे व्याप्यहेतुमत्ताज्ञानरूपस्य पराम
र्शस्य प्रतिबंधः फलं साध्याप्रसिद्ध्यादयस्तु व्याप्यत्वासिद्धिः साध्ये साध्यतावच्छेद
कस्याभावः साध्याप्रसिद्धिः एतज्ज्ञाने जाते कांचनमयवह्निमान्नित्यादौ साध्यताव
च्छेदकविशिष्टसाध्यपरामर्शप्रतिबंधः फलं एवं हेतौ हेतुतावच्छेदकस्याभावः सा
धनासिद्धिः यथा कांचनमयधूमादित्यादौ अत्र च हेतुतावच्छेदकविशिष्टहेतोर्ज्ञा
नाभावात्तद्घटितव्याप्तिज्ञानादेरभावः फलं एवं वह्निमान्नीलधूमादित्यादौ गुरु
तया नीलधूमत्वस्य हेतुतानवच्छेदकत्वमपि व्याप्यासिद्धिरिति वदंति बाधस्तु पक्षे
साध्याभाववादिः एतस्य चानुमितिप्रतिबंधः फलं तद्धर्मिकतदभावप्रमा लौकिकसन्निक

९८

षाजन्यदोषविशेषाजन्यतद्धर्मिकतज्ज्ञानमात्रेविरोधित्वमिति नच संशयसाधारणं
पक्षे साध्यसंसृष्टत्वज्ञानमनुमितिकरणं तद्विरोधितयाचबाधसत्प्रतिपक्षयोर्हे
त्वाभासत्वमितिनुयुक्तम् अप्रसिद्धसाध्यकानुमित्यनापत्तेः साध्यसंशयादिकंवि
नापि अनुमित्युत्पत्तेश्च एवंसाध्याभावज्ञानेप्रमात्वज्ञानमपिनप्रतिबंधकं प्रमा
णाभावात् गौरवाच्च अन्यथा सत्प्रतिपक्षादावपि तदभाव व्याप्यज्ञानस्याप्रमात्व
विषयकत्वेनप्रतिबंधकतापत्तेः किंतु भ्रमत्वज्ञानानास्कंदितबाधादिबुद्धेः प्रति
बंधकता तत्रभ्रमत्वमप्राकाविघटनेनप्रमाणपज्ञानंक्वचिदुपयुज्यते नचबा
धस्यत्वेपक्षेहेतुसत्त्वेव्यभिचारः पक्षेहेत्वभावेस्वरूपासिद्धिरेवदोष इतिवाच्यम्
बाधज्ञानस्यव्यभिचारज्ञानादिभेदात् किंच यत्रपरामर्शानंतरंबाधबुद्धिस्तत्र
व्यभिचारज्ञानादेरकिंचित्करत्वाद्बाधस्यानुमितिप्रतिबंधकःफलवाच्यः एवंय
त्र उत्पत्तिक्षणावच्छिन्नघटादौगंधव्याप्यपृथिवीत्ववत्ताज्ञानं तत्रबाधस्यैवप्रति

त्या॰
मु॰
४७

वेधकत्वं वाच्यं न च पक्षे घटे गंधसत्त्वात्कथं वाध इति वाच्यं पक्षतावच्छेदकदेशाका
लावच्छेदेनानुमितेरनुभवसिद्धत्वादिति सत्प्रतिपक्षभिन्नोयं हेत्वाभासस्तद्व्याप्या
स्रपि तन्मध्यपातित्वात भवति अन्यथा हेत्वाभासाधिक्यप्रसंगादिति वाधव्याख्यास
त्प्रतिपक्षेभिन्न एवस्वतंत्रेच्छेन मुनिना पृथगुपदेशात् सत्प्रतिपक्षव्याख्यानप्र
तिबंधक इति यः सपक्षे विपक्षे च भवेत्साधारणस्तु सः सपक्षविपक्षवृत्तिः साधा
रण इत्यर्थः सपक्षः निश्चितसाध्यवान् विपक्षः साध्याभाववान् विरुद्धवारणा
य सपक्षवृत्तित्वमुक्तं वस्तुतो विपक्षवृत्तित्वमेव वाच्यं विरुद्धस्यासाधारणत्वे
पि दूषकताबीजस्य भिन्नतया तथात्वस्य पार्थक्यात् यस्तूभयस्माद्व्यावृत्तः स
त्वसाधारणो मतः सपक्षविपक्षाव्यावृत्त इत्यर्थः सपक्षः साध्यवत्तया निश्चितः वि
पक्षः साध्याभाववत्तया निश्चितः शब्दो नित्यः शब्दत्वादित्यादौ यदा शब्दे अनित्यत्व
स्य संदेहः तदा सपक्षत्वं घटादीनामेव तद्व्यावृत्तं च शब्दत्वमिति तदानं दसाधा ४७

रणं यदा तु प्राचां ऽनित्यत्वस्यानिमग्राह्यः तदानासाधारणं इदंतु प्राचांमते न॥
नवीनमतं तु पूर्वमुक्तमेव तथैवानुपसंहारीकेवलान्वयिपक्षकः सर्वमभिधे
यंप्रमेयत्वादित्यादौ सर्वस्यैव पक्षत्वात् सामानाधिकरण्यग्रहस्य लोन्तराभा
वान्नानुमितिः इदंतु न सम्यक् पक्षैकदेशे सहचारग्रहेपि पक्षेतर भावादिति॥
नस्तु वा सहचारा ऽग्रहस्तावतापि अज्ञानरूपासिद्धिरेव न तु तावतादेत्वा
भासत्वं तस्य तथापि केवलान्वयिसाधकत्वम् यः साध्यवति नैवास्ति सवि
रुद्ध उदाहृतः २४ यत्कारेणसाध्यवत्तावच्छेदनहेत्वभावो बाधतः तथा
च साध्यव्यापकीभूताभावप्रयोगित्वं तदर्थः असिद्धिं विभजेत आश्रयासि
द्धिः साध्यास्यात्स्वरूपासिद्धिरप्यथ व्याप्यत्वासिद्धिरपरा स्यादसिद्धिरतस्त्रिधा
पक्षासिद्धिर्यत्रपक्षेभवेन्मणिमयोगिरिः २५ पक्षासिद्धिराश्रयासिद्धिरित्यर्थः

त्या॰
मु॰
४८

रूपेऽव्यवं धूमवत्त्वादन्वासिद्धिरप्यापरः अपरात्वरूपासिद्धिरित्यर्थः व्याप्यत्वासि
द्धिरपरानीलधूमादिके भवेत् नीलधूमवत्त्वेन गुरुतया हेतुतावच्छेदकं
स्वसमानाधिकरणव्याप्यतावच्छेदकधर्मान्तराघटितस्यैव व्याप्यतावच्छेद
कत्वात् धूमप्रागभाववत्त्वसंग्रहायस्वसामानाधिकरण्येति विरुद्धयोः परामर्
शहेत्वोः सत्प्रतिपक्षता इति कपिसंयोगतदभावव्याप्यवत्तापरामर्शोपि न
तेति पक्षत्वमत उक्तं विरुद्धयोरिति तथाच स्वसाध्यविरुद्धसाध्याभाव
व्याप्यवत्तापरामर्शकालीनसाध्यव्याप्यवत्तापरामर्श इत्यर्थः साध्यशून्
न्यो यत्र पक्षस्त्वसौ बाधः उदाहृतः उत्पत्तिकालीनघटे गन्धादिर्यत्र साध्य
ते पक्षतावच्छेदकविशिष्ट इत्यर्थः तेन घटो गन्धवान् पृथिवीत्वादि स्यान्नातिः एवं मूलावच्छि
न्नो वृत्तः कपिसंयोगीत्यत्रापि बाध्यम् इति मुक्तावल्यामनुमानम् ॥ २ ॥

सादृश्यविशिष्टपिंडदर्शनेनेत्योद्बोधकविध
यानातिदेशवाक्यार्थस्मारकत्वादिति भावः ५

ग्रयोपमितिं व्युत्पादयति ग्रामीणस्य प्रथमतः पश्यतो गवयादिकं साह
श्यधीर्गवादीनां या स्यात्सा करणं मतं वाक्यार्थस्यातिदेशस्य स्मृतिर्व्यापा
र उच्यते गवयादिपदानां तु शक्तिधीरुपमाफलम् यत्रारण्यकेन केनचि
द्ग्रामीणायोक्तं गोसदृशो गवयपदवाच्य इति पश्चाच्च ग्रामीणेन क्वचिदरण्या
गवये — दौ गवयो दृष्टस्तत्र गोसादृश्यप्रज्ञानं यज्ज्ञातं तदुपमितिकरणं तदनन्तरं गोसदृशो
अन्यधर्मस्यान्यत्र प्र — गवयपदवाच्य इत्यतिदेशवाक्यार्थस्मरणं यज्ज्ञायते तदेव व्यापारः तदनन्तरं गव
तिपादकं वाक्यमतिदे — यो गवयपदवाच्य इति ज्ञानं यज्जायते तदुपमितिः न त्वयं गवयपदवाच्य इत्युपमि
शवान् — तिः गवयान्तरे शक्त्यग्रहाभावप्रसंगात् इत्युपमितिः ॥३॥ शाब्दबोधप्रका
रं दर्शयति पदज्ञानं तु करणं न तु ज्ञायमानं पदं करणं पदाभावेपि मौनिश्लोका
दौ शाब्दबोधात् द्वारं तत्र पदार्थधीः शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी

उपजीव्योपजीवकभावसंगतिमभिप्रेत्याह २

पदजन्यपदार्थोपस्थितावपि २ पदार्थज्ञानमात्रस्य व्यापारत्वे १ प्रत्यक्षेणोपस्थितेषु ३ वृत्तेस्तस्यानुपादाने ५

मा॰मु॰

४९

पदजन्यपदार्थस्मरणं व्यापारः अन्यथा पदज्ञानवतः प्रत्यक्षादिना पदार्थोपस्थिता
वपि शाब्दबोधापत्तेः तत्रापि वृत्त्या पदजन्यत्वं बोध्यम् अन्यथा घटादिपदात् समवा
यसंबंधेनाकाशस्मरणे जाते आकाशस्यापि शाब्दबोधापत्तेः वृत्तिश्च शक्तिल
क्षणान्यतरसंबंधः अत एव शक्तिज्ञानस्योपयोगः एवं शक्तिग्रहाभावे पदज्ञानेपि
तत्संबंधेन स्मरणानुपपत्तिः पदज्ञानस्य हि एकसंबंधिज्ञानविधया पदार्थस्मार
कत्वे शक्तिश्च पदेन सह पदार्थसंबंधः स चास्माच्छब्दादयमर्थो बोद्धव्य इतीश्व
रेच्छारूपा आधुनिके नाम्नि शक्तिरस्त्येव एकादशेऽहनि पिता नाम कुर्यादितीश्व
रेच्छायाः सत्वात् आधुनिकसंकेतिते तु न शक्तिरिति संप्रदायः नव्यास्तु ईश्वरेच्छा
न शक्तिः किंत्विच्छैव तेनाधुनिकसंकेतितेपि शक्तिरस्तीत्याहुः शक्तिग्रहस्तु व्याकर
णादितः तथा हि शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च ॥
वाक्यस्य शेषाद्विवृतेर्वदंति सान्निध्यतः सिद्धपदस्य वृद्धाः १ प्रकृतिप्रत्ययौ

पदजन्यपदार्थोपस्थिता विवक्षा ४

वाच्यवाचकसंबंधः १

आधुनिकैः पित्रादिभिरेकादशेऽहनि संकेतितेनाम्नि

ननु वृत्तिर्यदि शक्तिलक्षणान्यतरसंबंधस्तदा गौणीबोधान स्यात् तत्र लक्षणापद तेन पदार्थोपस्थिते रसाभावात् ग्रहः

इति त्वजातेः प्राक्यतावच्छेदकत्वे लाघवादि सर्पः ३

भूतमात्रायां वर्त्तमाने लडित्यादिव्याकरणं द्विसर्पः १

दीनां शक्तिग्रहे व्याकरणं तु दृष्टमिति कश्चित् तन्न सति बाधके त्यज्यते यथा वैयाकर-

णैराख्यातस्य कर्तरि शक्तिरुच्यते चैत्रः पचतीत्यादौ कर्त्रा सह चैत्रस्याभेदेना-

न्वयः तच्च गौरवात्त्यज्यते किन्तु कृतौ शक्तिर्लाघवात् इति कृतौ चादौ मकारी भूय

भासते न च कर्तुरनभिधानात् चैत्रादिपदोत्तरं तृतीयापत्तिरिति वाच्यम् कर्तृ

संख्यानभिधानस्यैव तत्र तंत्रत्वात् संख्याभिधानयोग्यपदस्य कर्मत्वाद्यनवरुद्धः

प्रथमान्तपदोपस्थाप्यः कर्मत्वादीत्यस्यैतरविशेषणत्वेनातात्पर्याऽविषयत्वमि-

त्यर्थः तेन चैत्र इव मैत्रो गच्छतीत्यादौ न चैत्रे संख्यान्वयः यत्र कर्मादौ न विशेष-

णत्वेनातात्पर्येण द्वारणाय प्रथमान्तेति यद्वा धात्वर्थातिरिक्तविशेषणत्व

प्रथमस्यार्थः तेन चैत्रइवमैत्रो गच्छतीत्यादौ चैत्रादेर्वारणं स्तोकं पचतीत्या-

दौ स्तोकादेर्वारणाय द्वितीयदलं तस्य द्वितीयान्तपदोपस्थाप्यत्वाद्वारणम्

एवं व्यापारेपि न शक्तिः गौरवात् रथो गच्छतीत्यादौ व्यापारे आश्रयत्वे वा

स्तोकमित्यस्य

तृतीयाम् ५ प्रयोजनकत्वा २ ५

द्वितीयदलस्य प्रयोजनं तदेतत् प्रयोजनं वक्तुमन्यथा प्रथमदलार्थमाह यद्वेति ४

लकारस्य सामान्यस्य व्यापारो ऽर्थ इति मीमांसकमतं दूषयति एवमित्यादिनाग्रन्थेन १

चक्कीनान्तीत्यादौ आपादरजनकत्वेन लक्षणा लक्षिकाभाजुधानीत्यादावप्यान्नस्याश्रयत्वलक्षणानियमो न संभवतीत्यत आह आदीति आदिना इहछति यजति इत्यादिसंग्रहः १

मा० मु०

५

लक्षणा जानातीत्यादौ आश्रयत्वे नश्यतीत्यादौ त्यादौ प्रतियोगित्वे निरूढलक्षणा उपमानाद्यथा शक्तिग्रहस्तथोक्तम् एवं कोशादपि शक्तिग्रहः सति बाधके क्वचित्त्यज्यते यथा नीलादिपदानां नीलरूपादौ नीलादिविशिष्टे च शक्तिः कोशेन व्युत्पादिता तथापि लाघवान्नीलादौ शक्तिः नीलादिविशिष्टे तु लक्षणा एवमाप्तवाक्यादपि यथा कोकिलः पिकपदवाच्य इत्यादि पिकादिशब्दानां शक्तिग्रहः एवं व्यवहारादपि यथा प्रयोजकवृद्धेन घटमानयेत्युक्ते तच्छ्रुत्वा प्रयोज्यवृद्धेन घट आनीतः तदवधार्य पार्श्वस्थो बालो घटानयनरूपं कार्यं घटमानयेति शब्दप्रयोज्यमित्यवधारयति ततश्च घटं नय गामानयेत्यादिवाक्यादावापोद्वापाभ्यां घटादिपदानां कार्यान्विते घटादौ शक्तिं गृह्णाति इति इत्थं च भूतले नीलो घट इत्यादिपदान्न शाब्दबोधः घटादिपदानां कार्यान्विते घटादिबोधे सामर्थ्यावधारणात् कार्यतावाधर्मीतिचल्लिङादीनामसमर्थ्या ५

नीलादिमत्वापेक्षया नीलत्वादिजातेर्लाघवेन तस्याः शक्यतावच्छेदकत्वादिति भावः ४

कार्यतावोधं प्रति पदानां सहजन्यकार्योपस्थितिद्वारा हेतुत्वं घटादिपदानां कार्यत्वस्मारकशक्त्या कार्यत्वोपस्थापकलिङादिपदाभावात् भूतले घट इत्यादितः शाब्दबोधः इति भावः

कार्यान्वितघटशाब्दत्वापेक्षया घटमात्रस्य
कार्यतावच्छेदकत्वे लाघवेनेत्यर्थः २

कार्यत्वादिविषयकबोधं प्रति पदानां हेतुत्वादेव २

त् तदभावान्न शाब्दबोध इति केचित् तन्न प्रथमतः कार्यान्वितघटादौ शक्त्यवधा
रणेपि लाघवेन पश्चात्तस्य परित्यागौचित्यात् अत एव चैत्र पुत्रस्ते जातः कन्या ते
गर्भिणीत्यादौ मुखप्रसादमुखमालिन्याभ्यां सुखदुःखे अनुमाय तत्कारणत्वेन
परिशेषात् शाब्दबोधं निर्णीय तद्धेतुतया तं शब्दमवधारयन्ति तथा च व्यभि
चारात् कार्यान्विते न शक्तिः न च तत्र ते पुत्र इत्यादिशब्दानन्तरमध्याहार्यमाणा
भावात् चैत्र पुत्रस्ते जातो मृत इत्यादौ तदभावाच्च इत्थं च लाघवादन्वितघटेपि
शक्तिं मत्वा घटपदस्य घटमात्रे शक्तिमवधारयन्ति वाक्यशेषादपि शक्तिग्रहः य
था यवमयश्चरुर्भवतीत्यत्र यवपदस्य दीर्घशूकविशेषे आर्याणां प्रयोगः कंगौ
च म्लेच्छानां तत्र हि वसंते सर्वसस्यानां जायते पत्रशातनं मोदमानाश्च तिष्ठंति यवाः कणिशशालिन इति
वाक्यशेषाद्दीर्घशूकविशेषे शक्तिर्निर्णीयते कंगौ तु शक्तिभ्रमात् प्रयोगः नाना

तदुक्तशाब्दबो
धहेतुतया ४

तं पुत्रस्ते जातादिकार्य
तावोधकपदाध्या
हारसंभवाद्वेत्य
र्थः ६

सुखदुःखयोः का
रणत्वेन ३

घटादिपदैः कार्य
ताविषयकस्यैव बो
धोजननादिति निय
मे व्यभिचारादित्यर्थः

अन्वितघटे शक्ति
कल्पनापेक्षया घ
टमात्रे तत्कल्पने
लाघवादित्यर्थः ६

नन्वस्तु यवपदस्य वाक्य
शेषाद्दीर्घशूके शक्तिः कं
गावपि शक्तिसत्वे बाधकाभा
व इत्यत आह १

यथा मार्तण्डः तस्य विवरणं सूर्यः २

कथं तर्हि हर्यादिपदे नानाशक्तिकल्पनेत्यत आह १

तत्र कोऽपि श्लेषाभयत्र तुल्यत्वात्प्रकृते तु वाक्यशेषस्यैव विनिगमकत्वादिति भावः १

न्या. भा.

शक्तिकल्पने गौरवात् हर्यादिपदादौ विनिगमकाभावान्नानाशक्तिकल्पनम् एवं विव
रणादपि शक्तिग्रहः विवरणं तु समानार्थकपदान्तरेण तदर्थकथनं यथा घटोऽस्ती
त्यत्र कलशोऽस्तीत्यनेन विवरणेन घटपदस्य कलशे शक्तिग्रहः एवं पचतीत्यस्य पा
कं करोतीत्यनेन विवरणेनाख्यातस्य यत्नार्थकत्वं कल्प्यते एवं प्रसिद्धपदसान्नि
ध्यादपि शक्तिग्रहः यथा इह सहकारतरौ मधुरं पिको रौतीत्यादौ पिकपदस्य को
किले शक्तिग्रह इति तत्र जातावेव शक्तिर्न तु व्यक्तौ व्यभिचारादानन्त्याच्च व्यक्तिवि
ना जातिभानस्यासम्भवाद्व्यक्तेरपि भानमिति केचित् तन्न शक्तिं विना व्यक्तिभा
नानुपपत्तेः न च व्यक्तौ लक्षणा अनुपपत्तिप्रतिसंधानं विनापि व्यक्तिबोधात् न च
व्यक्तिशक्तावानन्त्यम् सकलव्यक्तावेकस्या एव शक्तेः स्वीकारात् न चाननुगमः गोत्वा
देरेवानुगमकत्वात् किंच गोः शक्यशक्तिग्रहो यदि तदा तद्व्यक्तौ शक्तिः यदि गो

व्याहृतीतशक्तिक शक्यत्वपि शब्द बोधादेपनतत्र शक्तिज्ञानाभावाद्व्यक्ति चार इति भावः द्वितीयेन महानत्वादि नि व्यक्ति भेदेन शक्तिभेदाद्व्यानन्त्यादित्यर्थः ५

गोत्वादेरेवेति तेनाच गोशब्दवाच्यो गोत्वविशिष्ट एव विषयेक शक्तिज्ञानत्व न हेतुत्वान्नोक्तदोषः इति भावः १

गोविशेष्यक गोत्वप्रकारक ज्ञानं प्रति गोत्वशक्तिज्ञानत्वेन हेतुत्वे तस्मिन्नत्वादेतादृशानि प्रसंगवि रहादित्यत आह किंचेति

लक्षणापि तावत्तत्र स्यात् पदजन्यपदार्थोपस्थिति नैर्निर्वाहादिति भावः ३

इष्टापत्तिरेकरूपाया लक्षणा एकत्वादिति भावः २

शक्तिं विनेति पदजन्यपदार्थोपस्थितेः प्राग्बोधप्रतिसंधानुतया शक्तिं शक्तिं विना तद्ज्ञाना निर्वाहादिति भावः ५

त्वप्रकारकमिति शक्तिग्रहस्तदा गोत्वप्रकारकपदार्थस्मरणं शाब्दबोधश्च न स्यात् समा
नप्रकारकत्वेन शक्तिज्ञानस्य पदार्थस्मरणं शाब्दबोधं प्रति च हेतुत्वात् किं च गोत्वविष
दिशक्तिग्रहस्तदा गोत्वत्वं प्रकारतावच्छेदकं वाच्यम् गोत्वत्वं च गोभिन्नासमवेतत्वे स
ति सकलगोसमवेतत्वे तथा च गोव्यक्तीनां प्रकारतावच्छेदके अनुप्रवेशाच्च गौर
वं तस्मात् जात्याकृतिविशिष्टव्यक्तौ बाधानुपपत्त्या कल्प्यमाना शक्तिर्जातिमा
कृतिविशिष्टव्यक्तौ विश्राम्यतीति शक्तं पदं क्वचिद्यौगिकं क्वचिद्रूढं क्वचिद्योग
रूढं क्वचिद्यौगिकरूढं च तथा हि यत्रावयवार्थ एव बुध्यते तद्यौगिकं यथा पाच
कादिपदम् यत्रावयवशक्तिनैरपेक्ष्येण समुदायशक्तिमात्रेण बुध्यते तद्रूढं यथा
गोपदम् यत्रावयवशक्तिविषये समुदायशक्तिरप्यस्ति तद्योगरूढं यथा पंकजा
दिपदम् तथा हि पंकजपदमवयवशक्त्या पंकजनिकर्तृरूपमर्थं बोधयति समु

समानप्रकारकत्वेनेति ईदृशशक्तिज्ञानगोत्वप्रकारकत्वाभावेन सामानाधिकरण्यादेकोनप्रकारकस्मरणशाब्दबोधयोरनुपपत्तिरित्यर्थः १

अवयवसंस्थानरूपायाम् आकृतेः

मात्रपदेन लक्षणानादरः सूचितः २

कुमुदत्वेनरूपेणबोधेतात्पर्यज्ञानम् ४

मा०
मु०
५२

दायशक्त्याच पदत्वेनरूपेणपदंबोधयति नचकेवलावयवशक्त्याकुमुदेनमूयोगः स्या
दितिवाच्यम् रूढिज्ञानस्यकेवलयौगिकार्थबोधेप्रतिबंधकत्वादितिशाब्दः वस्तु
तस्तु समुदायशक्त्यापस्थितपद्मेऽवयवार्थपंकजनिकर्तुरन्वयोभवतिसान्निध्या
त् यत्ररूढ्यर्थस्यबाधःप्रतिसंधीयते तत्रलक्षणयाकुमुदादेर्बोधः यत्रतुकुमु
दत्वेनरूपेणबोधेनतात्पर्यज्ञानं पद्मत्वस्यचबाधस्तत्रचावयवशक्तिमात्रेण
निर्वाह इत्यप्याहुः यत्रतुस्थलपद्मावयवार्थबाधस्तत्रसमुदायशक्त्यापद्म
त्वेनरूपेणबोधः यदितुस्थलपद्मेविजातीयमेव तदालक्षणयैवेति यत्रतु
यौगिकार्थरूढ्यर्थयोःस्वातंत्र्येणबोधस्तद्यौगिकरूढं यथोद्भिदादिपदम्
तत्रहि उद्भेदनकर्त्तातरुगुल्मादिरपिबुध्यते यागविशेषोपीति लक्षणाशा
क्यसम्बंधस्तात्पर्य्यानुपपत्तिः गंगायांघोष इत्यादौ गंगापदस्यशक्यार्थप्र ५२

नाहप्राभवादस्तु निर्युक्तिकत्वादसं
द्रेयः प्रतिबन्धकत्वं हि तदभाववत्ता
निश्चयात्तदभाववत्ताव्याप्यवत्ताविषया
तानरूढिज्ञानेनअयविषयापिसंभव
तीत्याशयेनमालि
कीरमतमाह २

सान्निध्यात् ३

पंकजनिकर्तृत्वेन
प्राद्बोधनिर्वाहो
भवतीत्यर्थः ५

यष्टयः प्रवेशयेतिरस्मवान्वयानुपपत्तिर्भवत्येव कुतो
यष्टीनां भक्षणतमत्ताभावात्परं तु यष्टीः प्रवेशयेत्यत्रा
न्वयानुपपत्तिर्नास्त्येतो लक्षणा न स्यादि वक्ष्यमाणस्वरसमा
तिभावः ४

वाहरूपे घोषस्यान्वयानुपपत्तिस्तात्पर्यानुपपत्तिर्वा यत्र प्रतिसंधीयते तत्र लक्षणया
तीरस्य बोधः सा च शक्यसंबंधरूपा तथा हि प्रवाहरूपशक्यार्थसंबंधस्य तीरे ग्रहीत
त्वात्तीरस्य स्मरणं ततः शाब्दबोधः परंतु यद्यन्वयानुपपत्तिर्लक्षणाबीजं स्यात् तदा
यष्टीः प्रवेशयेत्यत्र लक्षणा न स्यात् यष्टिप्रवेशस्यान्वयानुपपत्तेरभावात् तेन प्रवे
भोजनतात्पर्यानुपपत्त्या यष्टिधरेषु लक्षणा एवं काकेभ्यो दधि रक्ष्यतामित्यादौ
काकपदस्य दध्युपघातके लक्षणा सर्वतो दधिरक्षायास्तात्पर्यविषयत्वात् ए
वं छत्रिणो यान्तीत्यादौ छत्रिपदस्यैकसार्थवाहित्वे लक्षणा इयमेवाजहत्स्वार्थल एकसार्थवाहित्व विशिष्टे ४
क्षणेत्युच्यते एकसार्थवाहित्वेन रूपेण छत्रितदन्ययोर्बोधात् यदि चान्वयानु
पपत्तिर्लक्षणाबीजं स्यात् तदा क्वचिद्गंगापदस्य तीरे क्वचिद्घोषपदस्य मत्स्या
दौ लक्षणेति नियमो न स्यात् इदं तु बोध्यं शक्यार्थसंबंधो यदि तीरत्वेन रूपे

ननु गंभीरत्वविशिष्टे लक्षणाग्रहस्य तेन रूपेण पक्षिति शाब्दबोधं प्रति हेतुतादेवेति २

स्वघटितपदवाच्यत्वसंबंधेनेर २

न्या॰
मु॰ ५३

लक्षितलक्षणा शक्तिसंबन्धान्तरमह्याप्ययांतर्भाव माह यत्रत्विति ३

एतगृहीतसत्तद्गंभीरत्वेनतुल्यैपाधीरत्वेबोधः यदितु गंगागंभीरत्वेन रूपेण गृहीतलक्षणार्थेन नैव
रूपेणास्य स्मरणात्शाब्दबोधस्य तत एव लक्ष्यतावच्छेदकेन लक्षणा न त्वप्रकारकस्य त
ल्लक्षणांविनाप्युपपत्तेः यत्र तु शक्यार्थस्य परंपरासंबंधरूपा लक्षणा सा लक्षि
तलक्षणेत्युच्यते यथा द्विरेफादिपदे रेफद्वयसंबंधो भ्रमरपदे ज्ञायते भ्रमरपद
स्य संबंधो भ्रमरे ज्ञायते तत्र लक्षितलक्षणा किन्तु लाक्षणिकेपदेनानुभवके लाक्ष
णिकार्थस्य शाब्दबोधेनु परस्परसंस्कारेण शक्तिलक्षणान्यतरसंबंधेनेतर पदार्था
न्वितस्य शक्यार्थस्य शाब्दबोधं प्रति पदस्यैतोसामर्थ्यावधारणात् वाक्ये तु शक्तेरभा
वात् वाक्यसंबंधरूपा लक्षणापि नास्ति यत्र गंभीरायां नद्यां घोष इत्युक्ते तत्र न
दीपदस्य नदीतीरे लक्षणा गंभीरपदार्थस्य नद्या सहाभेदान्वयः कश्चिदेकदेशा
न्वयस्यापि स्वीकृतत्वात् यदि तत्रैकदेशान्वयो न स्वीक्रियते तदा नदीपदस्य गंभी

ननु तच्छब्दबोधे तच्छक्यपदज्ञानत्वेन हेतुत्वाल्लाक्षणिकार्थशाब्दबोधः कथं स्यादित्यत आह किन्त्विति १

पदार्थः पदार्थेनान्वेति न त्वेकदेशेनेति २

ननु गम्भीरायां नद्यां घोष इत्यादौ नदीपदस्य नदीतीरे लक्षणास्वीकारे गंभीरपदार्थस्यैकदेशान्वयानुपपत्त्यापदलक्षणा स्वीकरणीया न वाक्यलक्षणा अस्य स्वरूपकीर्तनतमाह यत्र गंभीरायामिति २

ननु शक्यसंबंधो लक्षणा न च्यायस्य इति वाक्यस्य शक्या प्रसिद्धा तत्र लक्षणा न स्यादिति मीमांसकापत्तयमिदापत्त्याग्निराकुरुते वाक्ये त्विति ४

५३

प्रत्ययानन्वयानुरोधेनोत्तरपदलक्षणाः युक्तत्वादिति भावः २

रनदीतीरे लक्षणा गंभीरपदं तात्पर्यग्राहकं बहुव्रीहावप्येवं तत्र हि चित्रगुपदा
दौ यद्येकदेशान्वयः स्वीक्रियेत तदा गोपदस्य गोमति लक्षणा गवि चित्राभेदा-
न्वयः यदि त्वेकदेशान्वयो न स्वीक्रियेत तदा गोपदस्य चित्रगोमति लक्षणा चि-
त्रपदं तात्पर्यग्राहकं एवमारूढवानरो वृक्ष इत्यत्रापि वानरपदस्य वानरारोहण
कर्मणि लक्षणा आरूढपदं तात्पर्यग्राहकम् एवमन्यत्रापि बोध्यम् तत्पुरुषे
तु पूर्वपदे लक्षणा तथा हि राजपुरुषादिपदे राजादिपदार्थेन पुरुषादिपदार्थस्य
साक्षान्नान्वयः निपातातिरिक्तनामार्थयोर्भेदेनान्वयबोधस्याव्युत्पन्नत्वात् अन्य
था राजा पुरुष इत्यादावपि तथान्वयबोधः स्यात् घटो न पट इत्यादौ घटपटा-
भावे नञर्थस्य साक्षादेवान्वयान्निपातातिरिक्तेति नीलो घट इत्यादौ नामार्थयो-
रभेदसंबंधेनान्वयादुक्तं भेदेनेति तत्र राजपुरुष इत्यादौ लक्षणैव मन्नैः स्वस्वामिकल्प

आरूढं वानरः यस्य इति आरूढ वानरो वृक्षः ४

निपातपदस्य व्युत्पत्त्यपेक्षया(?) कं तेन नञ्द्वन्द्वेत्या दाविवार्थमाहृत्य च द्रव्यस्य निपाता(?) तयोरन्वयोपपत्तिः

अव्ययनिपाता तिरिक्तनामा र्थयोरपि भेदेना न्वयबोधस्यासी कारे ४

इतरेतरद्वंद्वे २ द्वितीयं शंकते ४ साहित्यमपस्यते ३

मितिवाच्यम् असमस्तविभक्तेरपि ततोऽभेदबोधोदयात् तस्माद्राजपदस्य राजसंबंधिनि लक्ष

मा० मु ५४ णा तत्पुरुषेणासहाभेदान्वयः द्वंद्वे तु धवखदिरौ छिंधीत्यादौ धवस्य खदिरस्य

विभक्त्यर्थद्वित्वप्रकारेणावबोधात् अतस्तत्र न लक्षणा न च साहित्ये लक्षणेति वाच्यम्

सहवृत्तित्वरूपं साहित्यं लक्षणया एकक्रियान्वितत्वमिति कस्यचिन्मतं दूषयति ४

साहित्यस्यान्ययोरपि द्वन्द्वदर्शनात् न चैकक्रियान्वित्वरूपं साहित्यमस्त्येवेति वा

च्यम् क्रियाभेदेऽपि धवखदिरौ पश्य छिन्धि इत्यादौ द्वन्द्वदर्शनात् साहित्यस्या

वस्तुगत्या एकक्रियान्वयित्वस्य धवखदिरयोः सत्त्वे ऐकक्रियान्वितत्वप्राग्बोधाभावादित्यर्थः ५

नुभावाच्च अत एव राजपुरोहितौ सायुज्यकामो यजेतामित्यत्र लक्षणाभावो

द्वंद्वे लक्षणायाः स्वीकारे १

द्वन्द्वः स्वीक्रियते तस्मात् साहित्यादिकं नार्थः किंतु वास्तवो भेदो यत्र तत्र द्वन्द्वः

न च नीलघटयोरभेद इत्यादौ का गतिरिति वाच्यम् तत्र नीलपदस्य नीलत्वे घट

तथा च तयोर्भेदसत्त्वात् द्वन्द्व इति भावः २

पदस्य घटत्वे लक्षणा अभेद इत्यस्य चाश्रययोरभेद इत्यर्थात् समाहारद्वंद्वे ५४

तु यदि समाहारोऽप्यनुभूयते इत्युच्यते तदाहिनकुलमित्यादौ परपदेऽह

यदि समासघटकपदार्थयोरत्र भेदस्तत्रैव द्वंद्व इत्युच्यते तदा नीलघटयोर्भेदाभावात् कथं द्वंद्वः ३

ननु यदि द्वंद्वे न लक्षणा तदा कर्मधारयात् द्वंद्वस्य को विशेषः इत्याह ४

त्वाभ्यपर्यन्तत्वरूपेण स्वपदेन समाहारस्तदप्रयोग द्वंद्वादि समाहारादिनिर्देशे द्वंद्वे ५

स्तद्वृत्तिवादनमिति २ वादनकर्मीभ्यान् ३

नकुलसमाहारे लक्षणा सर्वपदं तु तात्पर्यग्राहकं नच भेरीमृदङ्गं वाद

येत्यत्र कथं समाहारस्यान्वयस्तस्यापेक्षा बुद्धिविशेषरूपस्य वादनासंभवा

दिति वाच्यम् परंपरासंबंधेन तदन्वयात् एवं पञ्चमूलीत्यादावपि पञ्चानां मूलानां समाहारः २

त्वेत्यादिषु तु ... नकुलमित्यादौ हि नकुलस्य बुध्यते प्रत्येकमेकत्वान्वयः समाहारस्य नन्वयदि समाहारो नबुध्यते तदेकस्य

तां च यत्रैकत्वं न एकत्वं प्राणितूर्यसेनाङ्गानां इत्यैकवद्भावः नैवत्र अन्यत्रत्वेक ऊनान्वयः समाहारोपि बुध्यते तर्हि समाहारोपीति शेषः ४

वचनमसाधुत्वमाहुः पितरौ श्वश्रुरावित्यादौ पितृपदे जनकदंपत्योः श्वशु माणयोरेकत्वाभाव इति प्रत्येक मिति ४

र पदे स्त्रीजनकदंपत्योर्लक्षणा एवमन्यत्रापि घटा इत्यत्र न लक्षणा घट घटश्च घटश्च घट

त्वेनरूपेण नानाघटोपस्थिति संभवात् कर्मधारये तु नीलोत्पल श्च ?

मित्यादावभेदेन संबंधेन नीलपदार्थ उत्प लपदार्थे प्रकारस्तत्र न

लक्षणा अत एव निषादस्थपतिं याजयेदि त्यत्र न तत्पुरुषोल स्वीक्रियते १

कर्मधारये लक्षणायाअभावादेव १

स्वाध्यायोऽध्येतव्य इति
श्रुतेरध्ययनविधिज्ञानाभावादिति भावः २

२ स्त्रीशूद्रौ नाधीयातामिति
स्मृत्यनेन तन्निषेधादिति भावः

लक्षणापत्तेः किंतु कर्मधारयो लक्षणाभावात् ... न च निषाद
ता. स्थपतिकरजातीयस्य वेदानधिकारात् याजना ... सम्भवश्रुतिबाधस्य
मु. ५५ निषादविद्याप्रयुक्ते सत एव कल्पनीयत्वात् लाघवेन मुख्यार्थान्वये तदनु
५५ पपत्त्याकल्पनायाः फलमुखगौरवतया दोषत्वादिति उपकुंभमर्द्धपिप्पली
त्यादौ परपदे तत्संबंधिनी लक्षणा सर्वपदार्थप्रधानतया चान्वयबोधादि
वैयाकरणम तेरूबयति ति ईदृशं च समासेन कापि शक्तिः पदशक्त्यैव निर्वाहादिति आसत्तिर्योग्य
ताकांक्षा तात्पर्यज्ञानमिष्यते कारणं आसत्तिज्ञानं योग्यताज्ञानमाकां
क्षाज्ञानं तात्पर्यज्ञानं च शाब्दबोधे कारणम् तत्रासत्तिपदार्थमाह संनि
धानं तु पदस्यासत्तिरुच्यते येन पदार्थस्य येन पदार्थेन सहान्वयोपेक्षितः तयोः
पदयोरव्यवधानेनोपस्थितिः शाब्दबोधे कारणं तेन गिरिर्भुक्तं वह्निमान्दे

कुंभोपलक्षितस्य कुंभसंबंधिन उपपदार्थसमीपे ऽभेदेनान्वयात् कुंभसंबंधाभिन्नसमीपमित्युपपदार्थविशेष्यको न्वयबोध इत्यर्थः ४

ताद्दशपदयोरव्यवधानमासत्तिः तदुपस्थितिकारणमित्यर्थः
तथाच गिरिपदार्थभुक्तपदार्थयोः अन्वयो न तात्पर्यविषयोऽपि तु गिरिपदार्थाग्निमत्पदार्थयोरेवेति तयोरव्यवधानाभावान्ना
न्वयबोध इति भावः १

समासघटकीभूत पदशक्तिलक्षणाभ्यां ५
ननु संनिधानं तु पदस्यासत्तिरुच्यते इति मूलोक्तस्यासत्तिलक्षणस्य गिरिर्भुक्त
मित्यत्रातिव्याप्तिस्तत्रापि गिरिपद भुक्तपदयोरव्यवधानसत्त्वादतो मूलमाच
ष्टे पदार्थेनेति २ ५५

तर्हि नच कथं नीलो घट इति शाब्दबोध
इत्यत आह भ्रमादिति ।

वदन्नेनेत्यादौ न शाब्दबोधः नीलो घटो द्रव्यं पट इत्यत्र यदा नीलपटयोरन्वयो
विवक्षितस्तदा नीलघटयोर्नासत्तिः आसत्तिभ्रमाच्छाब्दबोधमात्रं आसत्ति।
भ्रमाच्छाब्दबोधभ्रमाभावेपि न क्षतिः ननु यत्र छत्री कुण्डली वाससी देव
दत्त इत्याद्युक्तं तत्रोत्तरं पदस्मरणेन सर्वपदस्मरणस्यानापगात् अव्यवधानेनो
त्तरपदस्मरणासंभव इति चेन्न प्रत्येकपदानुभवजन्यसंस्कारसमूहस्मरणस्य तावत्
त्पदविषयिकस्मरणस्याव्यवधानेनोत्पत्तेः नानासन्निकर्षैरेकप्रत्यक्षस्येव
नानासंस्कारैरेकस्मरणोत्पत्तेरपि संभवात् तावत्पदसंस्कारसहितचरम
पदज्ञानस्योद्बोधकत्वात् कथमन्यथा नानावर्णैरेकस्मरणं परंतु तावत्पदा
र्थानां स्मरणादेकदैव खलेकपोतन्यायात्तावत्पदार्थानां क्रियाकर्मभावेना।
न्वयरूपः शाब्दबोधो भवतीति केचित् वृद्धा युवानः शिशवः कपोताः खले

ना॰ मु॰ ५८

यथाग्नौ युगपत्पतन्ति तथैव सर्वे युगपत्पदार्था: परस्परेणान्वयिनो भवंति परंतु यद्यदाकांक्षितं योग्यं सन्निधानं प्रपद्यते तेनतेनान्वितः स्वार्थः पदैरेवावगम्यते तथा च खंडवाक्यार्थबोधानंतरं तथैव पदार्थस्मृत्या महावाक्यार्थबोधः स्यादाहुः इदंतु बोधाय यत्तद्द्वारमित्युक्तं तत्र पिधेहीत्यादिपदस्याज्ञानादेव बोधः नतु पिधानादिरूपार्थज्ञानात् पदजन्यतत्तत्पदार्थोपस्थितेरत्र शाब्दबोधहेतुत्वात् किंच क्रियाकर्मपदानां तेनतेनसहैव साकांक्षितत्वात् तेन क्रियापदं विनाकथं बोधः स्यात् तथा पुष्पेभ्य इत्यादौ स्पृहयतीत्यादिपदाध्याहारं विना चतुर्थ्यनुपपत्तेः पदस्याध्याहार आवश्यकः योग्यतानिर्वक्ति पदार्थेतत्रतद्वत्तायोग्यता परिकीर्तिता एकपदार्थेऽपरपदार्थसंबंधो योग्यतेत्यर्थः तद्ज्ञानाभावाच्च वह्निना सिंचतीत्यादौ न शाब्दबोधः ननैतस्या योग्यतायाज्ञानं शाब्दबोधात्प्राक्कस

५८

वेन्न न संभवति वाक्यार्थस्याऽपूर्वत्वादिति चेन्न तत्तत्पदार्थस्मरणेऽसति क्वचि
त्संशयरूपस्य क्वचिन्निश्चयरूपस्यापि योग्यताज्ञानस्य संभवात् नव्यास्तु
योग्यताज्ञानेन शाब्दबोधे कारणम् वह्निना सिंचतीत्यादौ सेके वह्निकरणकत्वा
भावरूपायोग्यतायां निश्चये न प्रतिबंधान्न शाब्दबोधस्तदभावनिश्चयस्य लौकि-
कसन्निकर्षाजन्यदोषविशेषाजन्यतज्ज्ञानमात्रे प्रतिबंधकत्वात् शाब्दबोधस्या
पि प्रतिबंधकत्वं सिद्धं योग्यताज्ञानविलंबाच्च शाब्दबोधविलंबोऽसिद्ध इत्याहुः
आकांक्षां निर्वक्ति यत्पदेन विना यस्याननुभावकता भवेत् आकांक्षा येन प
देन विना यत्पदस्यान्वयाननुभावकत्वं तेन पदेन सह तस्याकांक्षेत्यर्थः क्रिया
पदं क्रियाकारकपदं नान्वयबोधं जनयतीति तेन तस्याकांक्षा वस्तुतस्तु क्रिया
कारकपदानां सन्निधानमाहत्याचरितार्थं परंतु घटकर्मताबोधं प्रति घटपदो

क्रियापदेन २ तत्पदविशिष्टत्वेतत्पदविशिष्टस्येत्यर्थः ३
कारकपदस्य २

सिद्धमिति तथाच
योग्यताज्ञानस्य
शाब्दबोधं प्रति
प्रतिबंधकत्वस्य क्ल
प्तत्वात् तेनैव वि
लंबोऽयोग्यताज्ञा
नस्याऽसिद्धिप्र
तिबंधकत्वं न क
ल्प्यत इतिभावः ५

त्तरद्वितीयारूपाकांक्षाज्ञानं कारणं तेन घटः कर्मत्वमानयनं कृतिरित्यादौ न
शाब्दबोधः अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यतामित्यादौ पुत्रेण सह राजपद
स्य तात्पर्यग्रहे [illegible]त्वात्तेनैवान्वयबोधः पुरुषेण सह तात्पर्यग्रहे तु तेन सहान्व
यबोधः स्यादेव तात्पर्यनिर्वाहकं वक्तुरिच्छा तु तात्पर्यं परिकीर्तितम् यदि ता
त्पर्यज्ञानं न कारणं स्यात्तदा सैन्धवमानयेत्यादौ क्वचिदश्वस्य क्वचिल्लव
णस्य बोध इति नियमो न स्यात् न च तात्पर्यग्राहकानां प्रकरणादीनां शाब्द
बोधे कारणत्वमस्त्विति वाच्यम् तेषामननुगमात् तात्पर्यज्ञानजनकत्वेन ते
षामनुगमे तु तात्पर्यज्ञानमेव लाघवात् कारणमस्तु इत्थं च वेदस्थलेऽपि ता
त्पर्यज्ञानार्थमीश्वरः कल्प्यते न च तत्राध्यापकस्य तात्पर्यज्ञानं कारणमिति
वाच्यं सर्गादावध्यापकाभावात् न च प्रलय एव नास्ति कुतः सर्गादिरिति

आदिनासंयोगविप्र
योगसाहचर्यादीनां
परिग्रहः ५

तथाच परस्परज
न्यशाब्दबोधे परस्प
रव्यभिचारेण न हेतु
त्वसंभव इति भावः ४

शाब्दबोधत्वावच्छिन्नं प्रति तात्पर्यज्ञानस्य
हेतुत्वे चेत्सर्पः ३

नाहो न रात्रिर्न नभो न भूमिर्नासीत्तमो
ज्योतिरभून्न चान्यदित्यागमेत्यर्थः १

सहकृतेत्यर्थः २

मीमांसा ... कालक्षेः ३

हेत्वनुमेतया
दृष्टिव्यापारः २

वाच्यम् प्रलयस्यागमप्रतिपाद्यत्वात् इत्थं च शुकवाक्येपीश्वरीयतात्पर्यज्ञानं कार-
णं विसंवादे शुकवाक्येनुमीत्सयितुरेव तात्पर्यज्ञानं कारणम् तथा च शुकवाक्ये वि-
नैव तात्पर्यज्ञानं शाब्दबोधः वेदे त्वनादिमीमांसापरिशोधिततर्कैरर्थावधारणमि-
त्याहुः इति शाब्दबोधः ॥४॥ एवमनुभवस्मरणभेदाद्बुद्धेर्द्वैविध्यमुक्तं तत्रानुभव-
प्रकाराः प्रदर्शिताः सुगमतया स्मरणं न दर्शितं तत्र हि एवानुभवः कारणं अत्र केचित् अ-
नुभवत्वेन न कारणम् किन्तु ज्ञानत्वेन अन्यथा सकृदनुभूतस्य कालेनान्तरं स्मरणं
न स्यात् समानप्रकारकस्मरणेन पूर्वसंस्कारस्य विनष्टत्वात् मन्मते तु तेनैव स्मरणे-
न संस्कारान्तरद्वारा स्मरणान्तरं जन्यत इत्याहुः अन्ये यत्र समूहालम्बनोत्तरं घटपटा-
दीनां क्रमेण स्मरणमजनि तत्र सकलविषयकस्मरणं नाभूत् तत्र फलस्य संस्कारना-
शकत्वाभावात् कालस्य रोगस्य वा चरमफलस्य वा संस्कारनाशकत्वं वाच्यं तथा च

तर्कैरनुमानैः

प्रथमं समूहा-
लम्बनं ततः घट
ज्ञानं पट[ज्ञानं]
... भिन्नयोः
ज्ञानं ततः सक-
लविषयकैना-
ज्ञानं ...

न्या॰ मु॰ ५८

नैकमिकस्मरणानुपपत्तिः इत्थं च न स्मरणोत्तरस्मरणप्रसङ्गः चरमफलस्यैव संस्कारना
शकत्वात् न च पुनः पुनः स्मरणाद्दृढतरसंस्कारानुपपत्तिरिति वाच्यम् उद्बुद्धो
धकसमवधानस्य दार्ढ्यपदार्थत्वात् न च विनिगमनाभावादेवज्ञानत्वेनापि जनक
त्वं स्यादिति वाच्यं विशेषधर्मेण व्यभिचाराज्ञाने सामान्यधर्मेणान्यथासिद्धत्वात् क
थमन्यथा दण्डत्वभ्रमिद्वारा द्रव्यत्वेन रूपेण न कारणत्वं न चान्तरालिकस्मरणे
नो संस्कारनाशकत्वसंशयाद्व्यभिचारसंशय इति वाच्यम् अन्ते तत्संस्कारनाशक
त्वेनापि तथा चरमस्मरणस्यैव संस्कारनाशकत्वकल्पनेन व्यभिचारसंशयाभावात्
इदानीं क्रमप्राप्तं मनो निरूपयति साक्षात्कारे सुखादीनां करणं मन उच्यते एते
न मनसि प्रमाणं दर्शितं तथा हि सुखसाक्षात्कारः सकरणको जन्यसाक्षात्कारत्वा त्वा
च्चाक्षुषसाक्षात्कारवदित्यनुमानेन करणत्वेन मनसः सिद्धिः न चैवं दुःखादिसाक्षात्कार

ण आदिना ईच्छाद्वेषादयः। ५८

त्कारणामपिकारणांतराणिस्युरितिवाच्यं लाघवादेकस्यैवसकलसाक्षात्कार
कत्वोपपत्तेः एवंसुखादीनामसमवायिकारणसंयोगाश्रयतयामनसःसिद्धि
र्बोध्यः मनसोणुत्वेप्रमाणमाह अयौगपद्याज्ज्ञानानांतस्याणुत्वमपीष्यते
ज्ञानानांचाक्षुषरासनादीनामयौगपद्यमेककालोत्पत्तिर्नास्तीत्यनुभवसिद्धम्
तत्रनानेंद्रियाणांसत्त्वपिविषयसन्निधानेयत्संबन्धादेकेंद्रियेणज्ञानमुत्पद्य
ते यदसंबंधाच्च त्वगादिभिःपरैर्ज्ञानंनोत्पद्यते तन्मनसोविभुत्वेचासन्निधा
नेनसंभवतीतिनविभुमनः नचतदानीमदृष्टविशेषाद्बोधकविलंबादेवतत्
ज्ञानविलंबइतिवाच्यं तथासति चक्षुरादीनामप्यकल्पनापत्तेः नचदीर्घशष्कु
लीभक्षणादौनानावधानभाजांचकथमेकदानानेंद्रियजन्यज्ञानमितिवाच्यम्
मनसोतिलाघवात्त्वरयानानेंद्रियसंबंधेननानाज्ञानसंभवात् उत्पलशतप

न । सा'
ग । (म)
५ । ५६

न्नभेदाविवयौगपद्यप्रत्ययस्यभ्रांतत्वात् नचमनसः संकोचविकाशशालित्वादु
भयोपपत्तिरस्त्विति वाच्यम् नानावयवतन्नाशादिकल्पने गौरवाल्लाघवान्निर
वयवस्यैवाणुरूपस्यमनसः कल्पनादितिसंक्षेपः द्रव्यंनिरूप्य गुणान्निरूपय
ति अथद्रव्याश्रिताज्ञेयानिर्गुणाः निष्क्रियागुणाः अथेत्यादिना गुणत्वजा
तेः किंमानमिति चेदिदं द्रव्यकर्मभिन्ने सामान्यवति यत्कारणता साकिंचि
द्धर्मावच्छिन्ना निरवच्छेद्यकारणताया असंभवात् नहि रूपत्वादिकं सत्ता
वत्त्वावच्छेदका न्यूनातिरेकदेशवृत्तिकत्वात् अतस्तदनुविशेषात्यनुगतंवाच्य
तदेवगुणत्वमिति यद्यपिद्रव्याश्रितत्वं नत्वत्तत्वं कर्मादावतिव्याप्तिः तथापि
द्रव्यत्वव्यापकतावच्छेदकसत्ताभिन्नजातिमत्त्वेनतदर्थः भवति हि गुणत्वं
द्रव्यत्वव्यापकतावच्छेदकं नद्वत्त्वंगुणानामिति कर्मत्वं द्रव्यत्वेनद्रव्यत्वव्या

५९

न

पत्तावच्छेदकं गगनादौ द्रव्यकर्मणोरभावात् द्रव्यत्वत्वं सामान्यत्वादिकं वा जाति

रिति तद्व्युदासः निर्गुणा इति यद्यपि निर्गुणत्वं कर्मादावपि तथापि सामान्यत्वे न

सति कर्मान्यत्वे च सति निर्गुणत्वं बोध्यम् जात्यादीनां न सामान्यवत्त्वं कर्मणो

न कर्मान्यत्वं द्रव्यस्य न निर्गुणत्वमिति न तत्र जातिव्याप्तिः निष्क्रिया इति स्वरूपक

थनं न तु लक्षणं गगनादावतिव्याप्तेः रूपं रसः स्पर्शगन्धौ परत्वमपरत्वकं

द्रवो गुरुत्वं स्नेहश्च वेगो मूर्तगुणा अमी वेगस्थितिस्थापकोप्युपलक्षणीयः॥

अमूर्तेषु न वर्तन्त इत्यर्थः लक्षणं तु तावदन्यान्यत्वं एवमग्रेपि धर्माधर्मौ भा

वना च शब्दो बुद्ध्यादयोपि च एतेमूर्तगुणाः सर्वे विद्वद्भिः परिकीर्तिताः संख्या

द्याश्च विभागान्ता उभयेषां गुणा मताः मूर्तामूर्तगुणा इत्यर्थः लक्षणं तु मू

र्तवृत्तिवृत्ति अमूर्तवृत्तिवृत्ति गुणत्वव्याप्यजातिमत्त्वं संख्यात्वादिकमा

न्या॰ (मु॰) ६॰

दपृथक्त्वं समन्वयः संयोगश्च विभागश्च संख्याद्वित्वादिकास्तथा २६ पृथक्त्वादय
स्तद्वदेते नेकाश्रिता गुणाः अनेकाश्रिता इति संयोगविभागद्वित्वादीनि द्वित्री
नि त्रित्व चतुष्ट्वादिकं त्रिचतुरादिवृत्तीति बोध्यम् अतः शेषगुणाः सर्वे मता एकैक
वृत्तयः रूपरसगंधस्पर्शा एकत्वपरिमाणैकपृथक्त्वपरापरत्वबुद्धिः सुखदुःखेच्छा
द्वेषप्रयत्नगुरुत्वद्रवत्वस्नेहसंस्कारादृष्टशब्दा इत्यर्थः बुद्ध्यादिषट्कं स्पर्शान्ताः
स्नेहः सांसिद्धिको द्रवः अदृष्टभावनाशब्दा अमी वैशेषिका गुणाः बुद्ध्यादीनि
बुद्धिः सुखदुःखेच्छाद्वेषप्रयत्ना इत्यर्थः स्पर्शान्ता इति रूपरसगन्धस्पर्शा इत्य
र्थः द्रवो द्रवत्वं विशेषाणां च वैशेषिकाः स्वार्थेठक् विशेषगुणा इत्यर्थः सं
ख्यादिपरत्वान्तो द्रवो नैमित्तिकस्तथा गुरुत्ववेगौ सामान्यगुणा एते प्रकीर्तिताः
संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वानीत्यर्थः संख्यादिप

६॰

रत्वं तेजो द्रवत्वं स्नेह एव च एतौ द्वीन्द्रियग्राह्याः चक्षुषा त्वचापि ग्रहणयोग्यत्वा
त् अथ स्पर्शान्त शब्दकाः बाह्यैकैकेन्द्रियग्राह्याः रूपादीनां चक्षुरादिग्राह्यत्वा
त् गुरुत्वादृष्टभावनाः अतीन्द्रियाः विभूनां तु ये स्युर्वैशेषिका गुणाः अकारण
गुणोत्पन्ना एते तु परिकीर्तिताः बुद्धिसुखदुःखेच्छाद्वेषप्रयत्न धर्माधर्मभावना
शब्दा इत्यर्थः अकारणेति कारणगुणपूर्वका न भवन्तीत्यर्थः कारणगुणेन
गुण ये कार्य्यगुणा उत्पाद्यन्ते ते कारणपूर्वकाः रूपादयो वक्ष्यन्ते बुद्ध्यादयस्तु न ता
दृशाः आत्मादेः कारणाभावात् अपाकजास्तु स्पर्शान्ता द्रवत्वं तु तथाविधं स्ने
हवेगगुरुत्वैकपृथक्त्वं परिमाणकम् स्थितिस्थापक इत्येते स्युः कारणगुणोद्भ
वाः अपाकजा इति पाकजरूपादीनां कारणगुणपूर्वकत्वाभावादपाकजा
इत्युक्तं तथाविधमपाकजं तथैकत्वमपि बोध्यम् संयोगश्च विभागश्च वेगश्चै

ता॰ मु॰

६१

तेतुकर्मजाः स्पष्टं कर्मजत्वं यद्यपि नसाधर्म्यं घटादावतिव्याप्तेः संयोगजसंयो
गजसंयोगेऽव्याप्तेश्च तथापि कर्मजन्यवृत्तिगुणत्वव्याप्यजातिमत्त्वं वोध्यम् ए
वमन्यत्राप्यूह्यम् स्पर्शान्तपरिमाणैकपृथक्त्वस्नेहशब्दके भवेदसमवायि
त्वमिति कपालादिरूपरसगन्धस्पर्शपरिमाणैकपृथक्त्वानां घटादिरू
परसगंधस्पर्शपरिमाणैकपृथक्त्वे नाम समवायिकारणत्वम् एवं श
ब्दस्यापि द्वितीयशब्दं प्रति एवं स्थितिस्थापकैकपृथक्त्वयोरपि ज्ञेयम् अपवै
शेषिकेगुणे आत्मनः स्यान्निमित्तत्वं आत्मविशेषगुणानामसमवायि
त्वानङ्गीकारात् बुद्ध्यादीनामिच्छादिनिमित्तत्वादिति भावः उष्णस्पर्शगुरु
त्वयोः वेगेपि च द्रवत्वे च संयोगादिद्वये तथा [illegible] द्विधैव कारणत्वं स्यादिति ए
असमवायिकारणत्वं निमित्तकारणत्वं चेत्यर्थः तथाहि उष्णस्पर्श उष्ण

६१

स्पर्शेऽसमवायी पाकजे निमित्तं गुरुत्वं गुरुत्वपतनयोरसमवायी अभिघाते नि
मित्तं द्रवत्वं द्रवत्वस्यंदनयोरसमवायि संग्रहे निमित्तं भेरीदंडसंयोगः शब्दे नि
मित्तं भेर्याकाशसंयोगोऽसमवायि अपाप्रादेशिको भवेत् वैशेषिको विभु
गुणाः संयोगादिद्वयं तथा ९२ अव्याप्यवृत्तिः चक्षुर्ग्राह्यं भवेद्रूपमिति रूपत्व
जातिस्तु प्रत्यक्षसिद्धा रूपशब्दोल्लेखिनी प्रतीतिर्नास्तीति चेन्मास्तु रूपशब्दप्र
योगस्तथापि नीलपीतादिष्वनुगतजातिविशेषोऽनुभवसिद्ध एव रूपशब्दा
प्रयोगेऽपि नीलो वर्णः पीतो वर्ण इति वर्णशब्दप्रयोगोल्लेखिनी प्रतीतिर
स्त्येव एवं नीलत्वादिकमपि प्रत्यक्षसिद्धं न चैकैक एव नीलादिव्यक्तय इति
एकव्यक्तित्वान्नीलत्वादिकं न जातिरिति वाच्यं नीलो नष्टो रक्त उत्पन्न इत्यादिप्र
तीतेर्नीलादेर्नाशोत्पादविनाशशालितया नानात्वात् अनायैक नीलनाशे ज

न्या
९२

गदनीलनाशापत्तेः न च नीलसमवायरक्तसमवाययोरेव विनाशोत्पादविष
यकोसौ प्रत्यय इति वाच्यं प्रतीतेः समवायानुल्लेखत्वात् न च स एवायं नील इति
प्रत्यक्षात् लाघवाच्चैक्यमिति वाच्यं प्रत्यक्षस्य तज्जातीयविषयत्वात् सैवेयं गुर्जरीति
वत् लाघवं तु प्रत्यक्षबाधितम् अन्यथा पटादीनामप्यैक्यप्रसंगात् उत्पाद
विनाशबुद्धेः समवायावलम्बनापत्तेरिति एतेन रसादिकमपि व्याख्यातम्
चक्षुर्ग्राह्यमिति चक्षुर्ग्राह्यविशेषगुण इत्यर्थः एवमग्रेपि द्रव्यादेरिति द्र
व्यादेरुपलम्भकम् उपलब्धिकारणम् इदमेव विवृणोति चक्षुषः सहका
रीत्यादि शुक्लादिकमनेकधा द्रव्यगुणकर्मसामान्यानां चाक्षुषप्रत्यक्षं प्रति
उद्भूतरूपं कारणं तच्च रूपं शुक्लनीलरक्तपीतकर्बुरादिभेदादनेकप्रकारं
भवति ननु कर्बुरं कथमतिरिक्तं भवति इत्थं नीलपीताद्यारब्धावयविनताव

नीलरूपः अप्रत्यक्षत्वप्रसंगात् नापि व्याप्यवृत्तिनीलरूपमुत्पद्यते पीताव
च्छेदेनापि नीलोपलब्धिप्रसंगात् नाप्यऽव्याप्यवृत्तिनीलादिकमुत्पद्यते व्या
प्यवृत्तिजातीयगुणानामव्याप्यवृत्तेर्विरोधात् तस्मान्नानाजातीयरूपैरवयवि
नि विजातीयं चित्ररूपमारभ्यते अत एकं चित्ररूपमित्यनुभवोपि नानारूप
त्वकल्पने गौरवात् इत्थं च नीलादीनां पीताद्यारंभप्रतिबन्धकत्वकल्पना
दवयविनि पीताद्युत्पत्तिः एतेन स्पर्शोपि व्याख्यातः रसादिकमपि नाव्याप्यवृ
त्तिः किंतु नानाजातीयै रसवद्द्रव्यैर्वैरारब्धेऽवयविनि रसाभावेपि न क्षतिः
अत्र रसनयावयवरसस्यैव ग्रहात् रसनेन्द्रियादीनां द्रव्यग्रहे सामर्थ्याभावा
त् अवयविनी नीरसत्वेपि क्षतेरभावात् न चास्तु तत्राव्याप्यवृत्त्येव नानारूप
नीलादेः पीतादिप्रतिबंधकत्वकल्पने गौरवात् अत एव लोहितो यस्तु व

ता॰

मु

६३

येन मुखे पुच्छे च पाण्डुरः श्वेतः खुरविषाणमध्यभागे नीलो वृष उच्यते इत्यादि
प्रामाण्यमप्युपपद्यते न च पाप्यापाप्यजातीययोर्विरोधः मानाभावात् न च ला
घवादिकानुभवविरोधात् अन्यथा घटादेरपि लाघवादैक्यं स्यादिति एतेन
स्पर्शादिकमपि व्याख्यातमित्यपि वदंति जलादिपरमाणौ नित्यमन्यत्स
हेतुकम् जलपरमाणौ तेजःपरमाणौ च रूपं नित्यं पृथिवीपरमाणुरूपं न
नित्यं तत्र पाकेन रूपांतरोत्पत्तेः नहि घटस्य पाकानन्तरं तदवयवा पक्वा उपल
भ्यन्ते नहि रक्तकपालस्य कपालिकानीलावयवा भवन्ति एवं क्रमेण परमा
णावपि पाकसिद्धिः अन्यदिति जलतेजःपरमाणुरूपभिन्नं रूपं सहेतुकं जन्यं
रसं निरूपयति रसः रसनाग्राह्यो मधुरादिरनेकधा सहकारी रसनायाः नि
त्यत्वादि च पूर्ववत् घ्राणग्राह्यो भवेद्गन्धो घ्राणस्यैवोपकारकः सौरभं चासौ २

रसंचतद्वेधापार्थिवोनिर्गतम् स्पर्शस्त्वगिन्द्रियग्राह्यः त्वचस्स्याडुपकारकः अनु
ष्णाशीतोष्णभेदात्सत्रिविधोमतः काठिन्यादिक्षितावेव नित्यतादिचपूर्ववत् ए
तेषांपाकजत्वंतुक्षितौनान्यत्रकुत्रचित् तत्रापिपरमाणौस्यात्पाकोवैशेषिकेमते
सहकारीरासनप्रत्यक्षंप्रतिरसः कारणमित्यर्थः पूर्ववत् जलपरमाणौरसोनित्यः
अन्यः सर्वोऽप्यनित्यइत्यर्थः गंधंनिरूपयति घ्राणेति उपकारकः घ्राणजन्यप्रत्यक्षे
कारणमित्यर्थः सौरभंचेति सर्वोऽपिगन्धोऽनित्यएव स्पर्शंनिरूपयति स्पर्श इति
उपकारकः स्पार्शनप्रत्यक्षे स्पर्शः कारणमित्यर्थः अनुष्णाशीत इति पृथिवी
वाय्वोः स्पर्शोऽनुष्णाशीतजलस्यशीतः उष्णस्तेजसः कठिनसुकुमारस्प
र्शः पृथिव्यामेवेत्यर्थः कठिनत्वादिकंतुनसंयोगगतोजातिविशेषः चक्षुर्ग्रा
ह्यतापत्तेः पूर्ववज्जलतेजोवायुपरमाणुस्पर्शाः नित्याः तद्भिन्नास्त्वनित्या इत्य
र्थः एतेषां रूपरसगंधस्पर्शानांपृथिव्यांहिरूपरसगन्धस्पर्शपरावृत्तिरग्नि

न्या.
(म)
६४

संयोगादुपलभ्यते नहि श्यामघटाध्मायमानेऽग्नौ लोहरूपादि परावर्तते नीरे सौरभमौष्ण्यं
चान्वयव्यतिरेकाभ्यामौपाधिकमेव निर्णीयते पवनस्पृष्टाः शीतस्पर्शादिवत् त
त्रापि पृथिवीष्वपि मध्ये परमाणावेव पाक इति वैशेषिका वदन्ति तेषामयमाशयः
अवयविनाशं विनाऽवष्टब्धेष्ववयवेषु पाको न संभवति परंतु वह्निसंयोगेनावयवि
ष्वस्वतंत्रेषु परमाणुषु पाकः पुनश्च पक्वपरमाणुसंयोगात् द्व्यणुकादिक्रमेण
पुनर्महावयवावयविपर्यंत उत्पत्तिस्तेजसामतिशयितवेगवशात् पूर्वव्यूहनाशोत्प
त्तिर्व्यूहान्तरोत्पत्तिश्चेति अत्र द्व्यणुकादिविनाशारम्भकतिभिः क्षणैः पु
नस्तत्र रूपादिमद्भवतीति शिष्यबुद्धिवैशद्यार्थं प्रक्रिया तत्र विभागजवि
भागानङ्गीकारे नवक्षणाः तदङ्गीकारे तु विभागः किंचित्सापेक्षो विभागजन
येत निरपेक्षस्य तत्त्वे कर्मत्वं स्यात् संयोगविभागयोरनपेक्षकारणं कर्मेति हि वै
शेषिकसूत्रम् स्वोत्तरभाविभावनापेक्षत्वम् अन्यथा कर्मणा पुनः संयोगजनने